॥ श्रीः ॥

चौखम्बा सुरभारती ग्रन्थमाला
२६

वाल्मीकिरामायणान्तर्गतं

# मूलरामायणम्

## संस्कृत-हिन्दीव्याख्योपेतम्

व्याख्याकारः—
श्रीकृष्णमणि त्रिपाठी
भू० पू० प्राध्यापक एवं अध्यक्ष
पुराणेतिहास, संस्कृति तथा भूगोल विभाग
सम्पूर्णानन्द संस्कृत विश्वविद्यालय, वाराणसी

चौखम्बा सुरभारती प्रकाशन
वाराणसी

हनुमान से भेंट हो गई। उनके माध्यम से सुग्रीव से मित्रता कर भ्रष्टाचारी बालि को मारकर राम ने सुग्रीव को किष्किन्धा का राजा बना दिया। सुग्रीव ने वानर और भालुओं को सीता का पता लगाने के लिए चारों ओर भेजा। सम्पाति के कथनानुसार हनुमान्‌जी ने सौ योजन लम्बे समुद्र को पार कर लङ्का की अशोकवाटिका में राम के चरणारविन्द का ध्यान करती हुई सीता को विश्वास के लिए राम की अँगूठी दी। सीता को आश्वासन देकर रावण के ५ सेनापति, ७ मन्त्रिपुत्र और अक्षयकुमार को मार डाला। बाद में क्रुद्ध मेघनाद द्वारा फेंके गये ब्रह्मपाश में स्वयं बँधकर हनुमान्‌जी रावण के दरबार में पहुँच गये। उन्होंने वहाँ पूँछ में वस्त्र बाँधकर आग लगा देनेके परिणाम-स्वरूप लङ्का जला डाली और राम के पास आकर सीता का समाचार कह सुनाया। बाद में राम ने सुग्रीव द्वारा वानर और भालुओं की सेना तैयार कर समुद्र के कहने से नल-नील द्वारा समुद्र में पुल बँधवा कर सेना के सहित पार उतर कर लङ्का पर चढ़ाई कर दी और संग्राम में कुलसहित रावण का वध किया। सबके समक्ष अग्निपरीक्षा कर सीता को स्वीकार किया और लंका की राजगद्दी पर विभीषण को बैठाकर पुष्पक विमान से अयोध्या की ओर प्रस्थान किया। राम रास्ते में पुनः भरद्वाज मुनि का दर्शन कर, हनुमान् द्वारा भरत के पास अपने आने का समाचार भेज कर, स्वयं नन्दीग्राम में भरत से मिलकर, भाइयों के साथ तापस वेष का परित्याग कर अयोध्या में प्रविष्ट हुए। वहाँ बड़ी धूम-धाम से श्रीराम का राज्याभिषेक हुआ।

राम ने अधिनायकवादी रावण को कुलसहित मार कर अपने राज्य को सच्चे लोकतन्त्रात्मक ढंग से चलाया। राम के राज्य में सभी धार्मिक, निरोग और सुखी थे। न तो पिता के सामने पुत्र का मरण होता था, न स्त्रियाँ विधवा होती थीं, न किसी को किसी प्रकार का कष्ट था। रामराज्य में न कभी अकाल पड़ा, न जलप्लावन हुआ, न अग्निकाण्ड हुआ। जनता धन-धान्य से सम्पन्न थी और सत्ययुग के समान इस त्रेतायुग में भी प्रसन्न रहा करती थी।

राम ने विधिपूर्वक सैकड़ों अश्वमेध यज्ञ कर वैदिक ब्राह्मणों को असंख्य सुवर्णदक्षिणा, करोड़ों गौ एवं अनन्त धन दिया, अगणित राजाओं को राज्यकर्म में नियुक्त किया और चारों वर्णों को अपने-अपने धर्म के पालन में लगाया। इस प्रकार ११००० वर्ष तक आदर्शमय राज्य करने के बाद श्रीराम बैकुण्ठ पधारे।

---

॥ श्रीः ॥

# मूलरामायणम्

## संस्कृत-हिन्दीव्याख्योपेतम्

---

तपःस्वाध्यायनिरतं तपस्वी वाग्विदां वरम्।
नारदं परिपप्रच्छ वाल्मीकिर्मुनिपुङ्गवम् ॥ १ ॥

**अन्वयः**—तपस्वी वाल्मीकिः तपःस्वाध्यायनिरतं वाग्विदां वरं मुनिपुङ्गवं नारदं परिपप्रच्छ ॥ १ ॥

**व्याख्या**—तपस्वी=तापसः, वाल्मीकिः=वाल्मीकिनामा महर्षिः, तपः-स्वाध्यायनिरतम्=तपस्यावेदाध्ययनतत्परम्, वाग्विदाम्=शब्दब्रह्मतत्त्वज्ञानाम्, वरम्=श्रेष्ठम्, मुनिपुङ्गवम्=ऋषिश्रेष्ठम्, नारदम्=नारदनामकं देवर्षिम्, ब्रह्मणो मानसं पुत्रं, परिपप्रच्छ=अत्यादरेण पृष्टवान् ॥ १ ॥

**समासादिः**—तप्यते भवबन्धनाशायेति तपः, प्रशस्तं तपोऽस्यास्तीति तपस्वी। वल्मीकस्यापत्यं पुमान् वाल्मीकिः। तपश्च स्वाध्यायश्च तपःस्वाध्यायौ, तयोः तत्र वा निरतः तपःस्वाध्यायनिरतः, तं तपःस्वाध्यायनिरतम्। वाचं विदन्तीति वाग्विदः, तेषां वाग्विदाम्। मुनिषु पुङ्गवः मुनिपुङ्गवः, तं मुनिपुङ्गवम्। नारं ज्ञानं ददातीति नारदः, तं नारदम्, यद्वा—नरस्येदं नारम् अज्ञानं, तत् द्यति खण्डयतीति नारदः, तं नारदम्। तथा चोक्तं नारदीयपुराणे—

'गायन्नारायणकथां सदा मायाभयापहम्।
नारदो नाशयन्नेति नृणामज्ञानजं तमः ॥'

अथवा नरति सद्गतिं प्रापयतीति नरः, नर एव नारः, परमात्मा तं ददाति उपदिशतीति नारदस्तं नारदम्। तदुक्तं महाभारते—"नरतीति नरः प्रोक्तः परमात्मा सनातनः।" ॥ १ ॥

**भावार्थः**—प्रशस्ततपस्क आदिकविः महर्षि वाल्मीकिः चान्द्रायणादिव्रत-परायणं वेदाध्ययनतत्परं शब्दतत्त्वविदां विशिष्टम् ऋषिश्रेष्ठं देवर्षि नारदं वक्ष्यमाणं वचः पृष्टवान् ॥ १ ॥

**भाषार्थ**—एक समय तमसातीर-निवासी महर्षि वाल्मीकि मुनि ने तपस्या और निरन्तर वेदपाठ में निरत, शब्दतत्त्व के रहस्य को जानने में श्रेष्ठ देवर्षि नारदजी से पूछा ॥ १ ॥

**को न्वस्मिन् साम्प्रतं लोके गुणवान् कश्च वीर्यवान् ।**
**धर्मज्ञश्च कृतज्ञश्च सत्यवाक्यो दृढव्रतः ॥ २ ॥**

**अन्वयः**—नु अस्मिन् लोके साम्प्रतं कः गुणवान् ? कश्च वीर्यवान् ? धर्मज्ञः कृतज्ञः सत्यवाक्यः दृढव्रतश्च कः ? ( अस्तीति शेषः ) ॥ २ ॥

**व्याख्या**—नु प्रश्ने, अस्मिन् लोके=भूलोके, साम्प्रतम्=अधुना, कः=कतमः पुरुषः, गुणवान्=प्रशस्तगुणसम्पन्नः, कश्च वीर्यवान्=पराक्रमी, धर्मज्ञः=वर्णाश्रमधर्मज्ञाता, कृतज्ञः=परोपकारवेत्ता, सत्यवाक्यः=सत्यवचनः, दृढव्रतः=अविचलितप्रतिज्ञः च, क एवंविधः पुरुषोऽस्तीति भावः ॥ २ ॥

**समासादिः**—प्रशस्ता गुणा वर्तन्ते अस्येति गुणवान् । वीर्यं विद्यतेऽस्येति वीर्यवान् । धर्मान् जानातीति धर्मज्ञः । कृतं जानातीति कृतज्ञः । सत्यं वाक्यं यस्य सः सत्यवाक्यः । दृढं व्रतं यस्य स दृढव्रतः ॥ २ ॥

**भावार्थः**—अस्मिन् भूतले सकलकलाकुशलः प्रशस्तगुणयुक्तः पराक्रमी धर्मवेत्ता उपकारज्ञः सत्यप्रतिज्ञः स्थिरनिश्चयश्च कः पुरुषो वर्तते ? इति भावः ॥२॥

**भाषार्थ**—भगवन् ! इस समय इस लोक में गुणवान्, पराक्रमी, धर्मों को जानने वाला, उपकार को माननेवाला, सत्यवादी और अपने नियम पर अटल रहने वाला पुरुष कौन है ? ॥ २ ॥

**चारित्रेण च को युक्तः सर्वभूतेषु च को हितः ।**
**विद्वान् कः कः समर्थश्च कश्चैकप्रियदर्शनः ॥ ३ ॥**

**अन्वयः**—( अस्मिन् लोके ) चारित्रेण च कः युक्तः ? सर्वभूतेषु च कः हितः ? को विद्वान् ? कश्च समर्थः ? प्रियदर्शनश्च कः ? ॥ ३ ॥

**व्याख्या**—( अस्मिन् लोके अधुना ) चारित्रेण=सदाचारेण च, कः=कतमः पुरुषः, युक्तः=समन्वितः, सर्वभूतेषु=सकलप्राणिषु च, कः हितः=हितकर्त्ता, कः विद्वान्=सर्वशास्त्रतत्त्वज्ञः, कश्च समर्थः=सर्वकार्यक्षमः, कश्च एकप्रियदर्शनः=अपूर्वप्रियदर्शनविषयीभूतः ? अस्तीति शेषः ॥ ३ ॥



**समासादिः**—चरित्रमेव चारित्रं, तेन चारित्रेण । सर्वाणि च तानि भूतानि सर्वभूतानि, तेषु सर्वभूतेषु । प्रियं दर्शनं यस्य सः प्रियदर्शनः, एकश्चासौ प्रियदर्शनः एकप्रियदर्शनः । वेत्ति जानाति सर्वमिति विद्वान् ॥ ३ ॥

**भावार्थः**—अस्मिन् संसारे इयान् चरित्रवान् सर्वहितकर्ता सकलशास्त्रतत्त्वज्ञः सर्वकार्यधुरन्धरः अपूर्वप्रियदर्शनविषयीभूतश्च कः पुरुषो विद्यते ? इति भावः ॥ ३ ॥

**भाषार्थ**—इस संसार में चरित्रवान्, सबका हित करने वाला, विद्वान् सर्वकार्यकरणक्षम और सबसे सुन्दर पुरुष कौन है ? ॥ ३ ॥

**आत्मवान् को जितक्रोधो द्युतिमान् कोऽनसूयकः ।**
**कस्य बिभ्यति देवाश्च जातरोषस्य संयुगे ॥ ४ ॥**

**अन्वयः**—जितक्रोधः आत्मवान् कः ? अनसूयकः द्युतिमान् कः ? संयुगे जातरोषस्य कस्य देवाः च बिभ्यति ? ॥ ४ ॥

**व्याख्या**—जितक्रोधः=सापराधेष्वपि क्रोधरहितः कः, आत्मवान्=धैर्यवान्, कः=कतमः, अनसूयकः=परगुणदोषकल्पनारहितः, द्युतिमान्=कान्तिमान् कः, संयुगे=युद्धे, जातरोषस्य=उत्पन्नक्रोधस्य, कस्य देवाः=अमराः, च बिभ्यति=भयं प्राप्नुवन्ति । अर्थात् देवेभ्योऽप्यधिकबलशाली कः अस्ति ? ॥४॥

**समासादिः**—जितः क्रोधो येन स जितक्रोधः । आत्मा अस्ति अस्येति आत्मवान् । अविद्यमाना असूया यस्यासौ अनसूयकः । द्युतिः अस्यास्तीति द्युतिमान् । जातः रोषो यस्यासौ जातरोषः, तस्य जातरोषस्य ॥ ४ ॥

**भावार्थः**—सापराधेष्वपि जनेषु क्रोधरहितः धैर्यवान् परदोषोद्घाटनरहितः कान्तिमांश्च कः पुरुषोऽस्ति ? तथा सङ्ग्रामे क्रुद्धात् कस्मात् इन्द्रादयो देवाः भयं कुर्वन्तीति भावः ॥ ४ ॥

**भाषार्थ**—गम्भीर, क्रोधरहित, कान्तिमान् तथा दूसरों के गुणों पर दोषारोपण न करनेवाला कौन पुरुष है ? एवं संग्राम में क्रुद्ध होने पर किससे देवता लोग भी डर जाते हैं ? ॥ ४ ॥

**एतदिच्छाम्यहं श्रोतुं परं कौतूहलं हि मे ।**
**महर्षे ! त्वं समर्थोऽसि ज्ञातुमेवंविधं नरम् ॥ ५ ॥**

**अन्वयः**—अहम् एतत् श्रोतुम् इच्छामि, हि मे परं कौतूहलं ( वर्तते ) । महर्षे ! त्वं एवंविधं नरं ज्ञातुं समर्थः असि ॥ ५ ॥

**व्याख्या**—अहम्=वाल्मीकिः, एतत्=पूर्वोक्तलक्षणसम्पन्नं पुरुषं, श्रोतुम्=आकर्णयितुम्, इच्छामि=वाञ्छामि, हि=यतः, मे=मम वाल्मीकेः, परम्=

अत्यन्तं, कौतूहलम्=कौतुकं ( वर्तते ), हे महर्षे !=ऋषिश्रेष्ठ ! त्वं=भवान्, एवंविधं=पूर्वोक्तलक्षणलक्षितं, नरं=पुरुषं, ज्ञातुम्=बोद्धुम्, समर्थः=कुशलः, असि=वर्तसे ॥ ५ ॥

**समासादिः**—कुतूहलमेव कौतूहलम् । महांश्चासौ ऋषिः महर्षिः, तत्सम्बुद्धौ हे महर्षे ! एवं विधा प्रकारो यस्य स एवंविधः, तम् एवंविधम् ॥ ५ ॥

**भावार्थः**—हे महर्षे ! अहं पूर्वोक्तलक्षणसम्पन्नं पुरुषं ज्ञातुमिच्छामि, भवान् हि चैतादृशं पुरुषं ज्ञातुं समर्थोऽसि, यतो भवान् योगबलेन सततं सर्वगः सर्वज्ञश्च विद्यते । अतः एवंविधस्य पुरुषस्य श्रवणे मम परमं कौतूहलं वर्तते, इति भावः ॥ ५ ॥

**भाषार्थ**—हे देवर्षि नारद ! मैं इस प्रकार के लक्षणों से सम्पन्न महापुरुष को जानना चाहता हूँ, मुझे बहुत बड़ी उत्कण्ठा है, क्योंकि आप ऐसे पुरुष को जानने में सर्वथा समर्थ हैं, इसलिए आप से पूछता हूँ ॥ ५ ॥

**श्रुत्वा चैतत् त्रिकालज्ञो वाल्मीकेर्नारदो वचः ।**
**श्रूयतामिति चामन्त्र्य प्रहृष्टो वाक्यमब्रवीत् ॥ ६ ॥**

**अन्वयः**—त्रिकालज्ञः नारदः वाल्मीकेः एतत् वचः श्रुत्वा, ( हे महर्षे ) 'श्रूयताम्' इति च आमन्त्र्य, प्रहृष्टः ( सन् ) वाक्यम् अब्रवीत् ॥ ६ ॥

**व्याख्या**—त्रिकालज्ञः=लोकत्रयज्ञानवान्, नारदः=नारदमुनिः, वाल्मीकेः=वाल्मीकिमुनेः, एतत्=पूर्वोक्तं, वाक्यं=वचनं, श्रुत्वा=निशम्य, (हे महर्षे !) श्रूयतां=निशम्यताम्, इति च=एतदपि, पूर्वोक्तम्, आमन्त्र्य=अभिमुखीकृत्य, प्रहृष्टः=प्रमुदितः सन्, वाक्यम्=वक्ष्यमाणं वचनम्, अब्रवीत्=अवोचत् ॥६॥

**समासादिः**—जानातीति ज्ञः, त्रयाणां कालानां ज्ञ इति त्रिकालज्ञः, यद्वा—त्रयाणां कालानां समाहारः त्रिकालं, तत् जानातीति त्रिकालज्ञः । वल्मीकस्यापत्यं पुमान् वाल्मीकिः, तस्य वाल्मीकेः ॥ ६ ॥

**भावार्थः**—कालत्रयज्ञानवान् देवर्षिर्नारदः महर्षेः वाल्मीकेः पूर्वोक्तं वचनम् आकर्ण्य हे महर्षे ! श्रूयतामिति च उक्त्वा प्रसन्नः सन् वक्ष्यमाणं वचनमवोचदिति भावः ॥ ६ ॥

**भाषार्थ**—तीनों कालों के समाचारों को जाननेवाले देवर्षि नारदजी महर्षि वाल्मीकि के उक्त वचन को सुनकर और हे महर्षे ! सुनिए, ऐसा कहकर आगे आनेवाली बातों को कहने लगे ॥ ६ ॥

**बहवो दुर्लभाश्चैव ये त्वया कीर्तिता गुणाः ।**
**मुने ! वक्ष्याम्यहं बुद्ध्वा तैर्युक्तः श्रूयतां नरः ॥ ७ ॥**



**अन्वयः**—हे मुने ! ये बहवः दुर्लभाः च गुणाः एव त्वया कीर्तिताः, तैर्युक्तः नरः श्रूयताम्, अहं बुद्ध्वा ( त्वां ) वक्ष्यामि ॥ ७ ॥

**व्याख्या**—हे मुने=हे देवर्षे ! ये=पूर्वोक्ताः, बहवः=अनेके, दुर्लभाः च=लब्धुमशक्याः, गुणाः=शौर्यौदार्यगाम्भीर्यादयः, एव त्वया=वाल्मीकिना, कीर्तिताः=कथिताः, तैः=पूर्वोक्तैः गुणैः, युक्तः=समन्वितः, नरः=पुरुषः, श्रूयतां=निशम्यताम्, अहं=नारदः, ( तं महापुरुषं ) बुद्ध्वा=मनसि विचिन्त्य, ( त्वाम् ) वक्ष्यामि=कथयिष्यामि ॥ ७ ॥

**समासादिः**—दुःखेन लभ्यन्ते इति दुर्लभाः ॥ ७ ॥

**भावार्थः**—हे महर्षे वाल्मीके ! ये अनेके गुणा भवता पूर्वं प्रतिपादिताः; ते एकस्मिन् पुरुषे दुर्लभा एव सन्ति तथापि तैर्गुणैर्विशिष्टं पुरुषं योगबलेन ज्ञात्वा अहं कथयिष्यामि, त्वया श्रूयतामिति भावः ॥ ७ ॥

**भाषार्थ**—हे महर्षि वाल्मीकिजी ! आपने जिन गुणों को पहले कहा है वे एक पुरुष में तो दुर्लभ हैं, फिर भी मैं मन में समझकर उन गुणों से सम्पन्न महापुरुष को बतलाता हूँ । आप सावधान होकर सुनिए ॥ ७ ॥

**इक्ष्वाकुवंशप्रभवो रामो नाम जनैः श्रुतः ।**
**नियतात्मा महावीर्यः द्युतिमान् धृतिमान् वशी ॥ ८ ॥**

**अन्वयः**—इक्ष्वाकुवंशप्रभवः नियतात्मा महावीर्यः द्युतिमान् धृतिमान् वशी जनैः श्रुतः रामो नाम ( अस्तीति शेषः ) ॥ ८ ॥

**व्याख्या**—इक्ष्वाकुवंशप्रभवः=इक्ष्वाकुकुलोत्पन्नः, नियतात्मा=संयतमनाः, महावीर्यः=विपुलबलशाली, द्युतिमान्=कान्तिमान्, धृतिमान्=धैर्यावलम्बी, वशी=जितेन्द्रियः, जनैः=लोकैः, श्रुतः=ज्ञातः, रामो नाम=राम इति नाम्ना प्रसिद्धः, अस्तीति शेषः ॥ ८ ॥

**समासादिः**—इक्ष्वाकोः वंश इक्ष्वाकुवंशः, प्रभवति अस्मादिति प्रभवः, इक्ष्वाकुवंशः प्रभवः उत्पत्तिस्थानं यस्य स इक्ष्वाकुवंशप्रभवः । नियतः आत्मा यस्य स नियतात्मा । महत् वीर्यं यस्य स महावीर्यः । द्युतिः अस्ति अस्येति द्युतिमान् । धृतिः अस्ति अस्येति धृतिमान् ॥ ८ ॥

**भावार्थः**—इक्ष्वाकुर्नाम वैवस्वतमनोः ज्येष्ठः पुत्रः तस्य वंशे समुत्पन्नः मनोविजयी पराक्रमशाली कान्तिमान्, धैर्यवान्, जितेन्द्रियः, लोके 'राम' इति नाम्ना प्रसिद्धः एवंविधः महापुरुषोऽस्तीति भावः ॥ ८ ॥

**भाषार्थ**—सूर्यवंशी महाराज इक्ष्वाकु के कुल में उत्पन्न, अपने मन को वश

में रखनेवाले, बलशाली, बड़े ही सुन्दर, धीर, इन्द्रिय-विजयी संसार में राम-नाम से प्रसिद्ध एक ऐसे महापुरुष हैं ॥ ८ ॥

**बुद्धिमान् नीतिमान् वाग्मी श्रीमाञ्छत्रुनिबर्हणः ।**
**विपुलांसो महाबाहुः कम्बुग्रीवो महाहनुः ॥ ९ ॥**

**अन्वयः**—( सः ) बुद्धिमान् नीतिमान् वाग्मी श्रीमान् शत्रुनिवर्हणः विपुलांसो महाबाहुः महाहनुः कम्बुग्रीवः ( चास्ति ) ॥ ९ ॥

**व्याख्या**—बुद्धिमान् = मतिमान्, अतिशयबुद्धिविशिष्टः, नीतिमान् = राजनीतिज्ञः, वाग्मी = प्रशस्तवाक् समयोचितवाक्चातुरीचतुरो वा, श्रीमान् = सर्वातिशयशोभैश्वर्यसम्पन्नः, शत्रुनिवर्हणः = शत्रुविनाशकः, विपुलांसः = उन्नतकन्धरः, महाबाहुः = दीर्घबाहुः, आजानुबाहुः, कम्बुगीवः = शङ्खसदृशकण्ठः, महाहनुः = मांसलकपोलाधोभागः, एवंविधः स रामोऽस्तीति शेषः ॥ ९ ॥

**समासादिः**—बुद्धिरस्यातीति बुद्धिमान् । नीतिरस्यास्तीति नीतिमान् । प्रशस्ता वाग् अस्यास्तीति वाग्मी । श्रीरस्यास्तीति श्रीमान् । निवर्हयति नाशयति दूरीकरोतीति वा निवर्हणः, शत्रूणां निवर्हणः शत्रुनिवर्हणः । विपुलौ अंसौ यस्यासौ विपुलांसः । महान्तौ बाहू यस्य स महाबाहुः । कम्बुरिव ग्रीवा यस्यास्तीति कम्बुग्रीवः । महान् हनु यस्य स महाहनुः ॥ ९ ॥

**भावार्थः**—बुद्धियुक्तः नीतिविशारदः समयोचितवाक्चातुरीचतुरः अतिसुन्दरः शत्रुविनाशकः उन्नतस्कन्धः दीर्घभुजः शङ्खसमानकण्ठः बृहद्धनुः स रामोऽस्तीति भावः ॥ ९ ॥

**भाषार्थ**—राम बड़े बुद्धिमान्, नीतिनिपुण, वाग्मी, शत्रुसंहारक, उन्नत कन्धेवाले, सबसे बढ़कर शोभासम्पन्न तथा ऐश्वर्यशाली, बड़ी-बड़ी बाहुवाले, शङ्ख के समान तीन रेखा से युक्त शुभलक्षण कण्ठवाले और महाहनु हैं ॥ ९ ॥

**महोरस्को महेष्वासो गूढजत्रुररिन्दमः ।**
**आजानुबाहुः सुशिराः सुललाटः सुविक्रमः ॥ १० ॥**

**अन्वयः**—( तथा सः ) महोरस्कः महेष्वासः गूढजत्रुः अरिन्दमः आजानुबाहुः सुशिराः सुललाटः सुविक्रमः ( अस्ति ) ॥ १० ॥

**व्याख्या**—( स रामः ) महोरस्कः=विशालवक्षःस्थलः, महेष्वासः=महद्भेद्यधनुः, गूढजत्रुः=अव्यक्तांशद्वयवर्तिसक्थिकः, अरिन्दमः=शत्रुविजयी, आजानुबाहुः = जानुपर्यन्तदीर्घभुजः, सुशिराः = शोभनशिरस्कः, सुललाटः = सुभालः, सुविक्रमः = महाशक्तिशाली अस्तीति शेषः ॥ १० ॥



**समासादिः**—महदुरो यस्य स महोरस्कः । इषवो बाणा अस्यन्ते क्षिप्यन्तेऽनेनेति इष्वासः, महान् इष्वासो यस्य स महेष्वासः । गूढे जत्रुणी यस्य स गूढजत्रुः । अरीन् दमयतीति अरिन्दमः । आजानु बाहू यस्य स आजानुबाहुः । शोभनः शिरो यस्य सः सुशिराः । शोभनं ललाटं यस्य सः सुललाटः । शोभनो विक्रमो यस्य सः सुविक्रमः ॥ १० ॥

**भावार्थः**—स रामः विशालवक्षःस्थलः अव्यक्तांशद्वयसक्थिकः, शत्रुविजयी, विशालबाहुः, सुमूर्धा, शोभनभालस्थलः, महाबलशाली चास्तीति भावः ॥१०॥

**भाषार्थ**—उनकी छाती अधिक चौड़ी है, उनका धनुष बहुत बड़ा है, कन्धे अति मांसल हैं, शत्रुओं पर विजय करनेवाले हैं, उनकी विशाल भुजाएँ घुटनों तक लम्बी हैं, उनके मस्तक और ललाट बहुत सुन्दर हैं और वे बहुत बड़े पराक्रमशाली हैं ॥ १० ॥

**समः समविभक्ताङ्गः स्निग्धवर्णः प्रतापवान् ।**
**पीनवक्षा विशालाक्षो लक्ष्मीवाञ्छुभलक्षणः ॥ ११ ॥**

**अन्वयः**—समः समविभक्ताङ्गः स्निग्धवर्णः प्रतापवान् पीनवक्षाः विशालाक्षः लक्ष्मीवान् शुभलक्षणः ( च सः अस्ति ) ॥ ११ ॥

**व्याख्या**—समः=समानः, समविभक्ताङ्गः=अन्यूनाधिकविभक्तकरचरणाद्यवयवः, स्निग्धवर्णः = श्यामलवर्णः, प्रतापवान्=विक्रमशाली, पीनवक्षाः=विशालवक्षःस्थलः, विशालाक्षः = आकर्णान्तनेत्रः, लक्ष्मीवान् = सर्वाङ्गशोभासम्पन्नः, शुभलक्षणः = सामुद्रिकशास्त्रोक्तसकलसुलक्षणलक्षितः, रामोऽस्तीति शेषः ॥११॥

**समासादिः**—समानि विभक्तानि अङ्गानि यस्य सः समविभक्ताङ्गः । स्निग्धः वर्णः यस्य सः स्निग्धवर्णः । पीन वक्षो यस्य सः पीनवक्षाः । विशाले अक्षिणी यस्य स विशालाक्षः । प्रतापः अस्ति अस्येति प्रतापवान् । लक्ष्मी अस्ति अस्येति लक्ष्मीवान् । शुभानि लक्षणानि यस्य सः शुभलक्षणः ॥ ११ ॥

**भावार्थः**—स रामो नातिदीर्घः नातिवामनः अन्यूनाधिककरचरणाद्यवयवः चिक्कणवर्णः विक्रमशाली विशालवक्षःस्थलः दीर्घलोचनः शोभासम्पन्नः सकलशुभलक्षणयुक्तश्चास्तीति भावः ॥ ११ ॥

**भाषार्थ**—राम न तो बड़े हैं न छोटे, उनका सारा शरीर बराबर भाग में बँटा है, उनका वर्ण श्याम है, वे बड़े प्रभावशाली हैं, उनका वक्षःस्थल बड़ा है, उनकी आँखे बड़ी-बड़ी है और वे सामुद्रिक शास्त्र में कहे हुए भाग्यशालियों के सभी शुभ लक्षणों से सम्पन्न हैं ॥ ११ ॥

**धर्मज्ञः सत्यसन्धश्च प्रजानां च हिते रतः ।**
**यशस्वी ज्ञानसम्पन्नः शुचिर्वश्यः समाधिमान् ॥ १२ ॥**

**अन्वयः**—धर्मज्ञः सत्यसन्धः प्रजानां च हिते रतः यशस्वी ज्ञानसम्पन्नः शुचिः वश्यः समाधिमान् च ( सः अस्ति ) ॥ १२ ॥

**व्याख्या**—धर्मज्ञः=धर्मज्ञाता, सत्यसन्धः=सत्यप्रतिज्ञः, प्रजानां=जनानां च, हिते=कल्याणे, रतः=तत्परः, यशस्वी=कीर्तिमान्, ज्ञानसम्पन्नः=ज्ञानवान्, शुचिः=बाह्याभ्यन्तरशुद्धः, वश्यः=वशंगतः, समाधिमान्=समाधिनिष्ठः, च स रामोऽस्तीति शेषः ॥ १२ ॥

**समासादिः**—धर्मं जानातीति धर्मज्ञः । सत्या सन्धा प्रतिज्ञा यस्य सः सत्यसन्धः । यशोऽस्यास्तीति यशस्वी । ज्ञानेन सम्पन्नः ज्ञानसम्पन्नः । समाधिः अस्यास्तीति समाधिवान् ॥ १२ ॥

**भावार्थः**—स रामो धर्मतत्त्ववेत्ता दृढप्रतिज्ञः जनकल्याणकरणे तत्परः कीर्तिमान् ज्ञानवान् बाह्याभ्यन्तरविशुद्धः गुरूणां वशंगतः समाधिनिष्ठः गुरुवर्योपदेशपरिशीलनसमासक्तश्च अस्तीति भावः ॥ १२ ॥

मर्यादापुरुषोत्तमस्य भगवतो रामस्य सत्यप्रतिज्ञत्वं तु सर्वविदितमेवास्ति । तथा हि वाल्मीकीये—

'अप्यहं जीवितं जह्यां त्वां वा सीते ! सलक्ष्मणाम् ।
नहि प्रतिज्ञां संश्रुत्य ब्राह्मणेभ्यो विशेषतः ॥'

**भावार्थ**—राम धर्मज्ञ, प्रजाकल्याणकारी, यशस्वी, ज्ञानी, परमपवित्र, गुरुओं के आज्ञाकारी और योग-क्रियाओं के करनेवाले भी हैं ॥ १२ ॥

**प्रजापतिसमः श्रीमान् धाता रिपुनिषूदनः ।**
**रक्षिता जीवलोकस्य धर्मस्य परिरक्षिता ॥ १३ ॥**

**अन्वयः**—प्रजापतिसमः श्रीमान् धाता रिपुनिषूदनः जीवलोकस्य रक्षिता धर्मस्य परिरक्षिता ( च वर्तते ) ॥ १३ ॥

**व्याख्या**—प्रजापतिसमः=ब्रह्मसदृशः, श्रीमान्=शोभासम्पन्नः, धाता=पितृवत् प्रजापालकः, रिपुनिषूदनः=शत्रुसंहारकः, जीवलोकस्य=प्राणिमात्रस्य, रक्षिता=रक्षकः, धर्मस्य च परिरक्षिता=सर्वतोभावेन धर्मरक्षकः, कामक्रोधादि शत्रुदमनकारको वा स रामोऽस्तीति भावः ॥ १३ ॥

**समासादिः**—पातीति पतिः, प्रजानां पतिः प्रजापतिः, तेन प्रजापतिना ब्रह्मणा समः प्रजापतिसमः । श्रीरस्यास्तीति श्रीमान् । रिपून् निषूदयतीति रिपुनिषूदनः । जीव एक लोकः जीवलोकः, तस्य जीवलोकस्य ॥ १३ ॥



**भावार्थः**—स रामो ब्रह्मणा तुल्यः शोभासम्पन्नः सर्वेषां पालकः शत्रुसंहारकः जीवमात्रस्य सर्वतोभावेन संरक्षकः धर्मस्य च त्रातास्तीति भावः ॥ १३ ॥

**भावार्थ**—राम ब्रह्मा के समान संसार की रक्षा करनेवाले श्रीमान्, सबके पालक, शत्रुओं को दण्ड देनेवाले, हर प्रकार से जीवमात्र और धर्म की रक्षा करनेवाले हैं ॥ १३ ॥

**रक्षिता स्वस्य धर्मस्य स्वजनस्य च रक्षिता ।**
**वेदवेदाङ्गतत्त्वज्ञो धनुर्वेदे च निष्ठितः ॥ १४ ॥**

**अन्वयः**—स्वस्य धर्मस्य रक्षिता, स्वजनस्य च रक्षिता वेदवेदाङ्गतत्त्वज्ञः, धनुर्वेदे च निष्ठितः ( रामोऽस्ति ) ॥ १४ ॥

**व्याख्या**—स्वस्य धर्मस्य रक्षिता=निजधर्मपालकः, वेदवेदाङ्गतत्त्वज्ञः—वेदानां=ऋग्यजुःसामाथर्वणां, वेदाङ्गानां=शिक्षाकल्पव्याकरणनिरुक्तच्छन्दोज्योतिषां च मर्मज्ञः, धनुर्वेदे=युद्धशास्त्रे च, निष्ठितः=प्रतिष्ठितः, पारदर्शी वा रामोऽस्तीति शेषः ॥ १४ ॥

**समासादिः**—स्वश्चासौ जन इति स्वजनस्तस्य स्वजनस्य । वेदस्याङ्गानि वेदाङ्गानि, वेदाश्च वेदाङ्गानि च वेदवेदाङ्गानि, तेषां तत्त्वं वेदवेदाङ्गतत्त्वं, तत् जानातीति वेदवेदाङ्गतत्त्वज्ञः ॥ १४ ॥

**भावार्थः**—स रामो निजधर्मस्य स्वस्य कुटुम्बस्य च प्रतिपालकः वेदवेदाङ्गमर्मवेत्ता, युद्धविद्याया विशारदश्चास्तीति भावः । वेदाङ्गानि यथा—

'शिक्षा कल्पो व्याकरणं निरुक्तं ज्योतिषां गतिः ।
छन्दसां विचितिश्चेति षडङ्गानि प्रचक्षते ॥'

**भावार्थ**—राम अपने ( क्षत्रिय ) धर्म और स्वजनों की रक्षा करने वाले हैं, वेद ( ऋग्वेद, यजुर्वेद सामवेद और अथर्ववेद ) और वेदाङ्गों ( शिक्षा, कल्प, व्याकरण, निरुक्त, छन्द और ज्योतिष ) के सार को समझनेवाले एवं युद्ध-कला में पारङ्गत ( परम प्रवीण ) हैं ॥ १४ ॥

**सर्वशास्त्रार्थतत्त्वज्ञः स्मृतिमान् प्रतिभानवान् ।**
**सर्वलोकप्रियः साधुरदीनात्मा विचक्षणः ॥ १५ ॥**

**अन्वयः**—सर्वशास्त्रार्थतत्त्वज्ञः स्मृतिमान् प्रतिभानवान्, सर्वलोकप्रियः साधुः अदीनात्मा विचक्षणः ( च स रामोऽस्ति ) ॥ १५ ॥

**व्याख्या**—सर्वशास्त्रार्थतत्त्वज्ञः=सकलशास्त्रमर्मज्ञः, स्मृतिमान्=स्मरणशक्तिशाली, प्रतिभानवान्=प्रत्युत्पन्नमतिशाली, सर्वलोकप्रियः=सकललोक-

रञ्जकः, साधुः = सज्जनः मधुरः, अदीनात्मा = अकातरस्वभावः, विचक्षणः = पण्डितः । स रामोऽस्तीति शेषः ॥ १५ ॥

**समासादिः**—सर्वाणि च तानि शास्त्राणि सर्वशास्त्राणि, अर्थश्च तत्त्वं च अर्थतत्त्वे, सर्वशास्त्राणाम् अर्थतत्त्वे सर्वशास्त्रार्थतत्त्वे, ते जानातीति सर्वशास्त्रार्थतत्त्वज्ञः । स्मृतिरस्ति अस्येति स्मृतिमान् । प्रतिभानमस्ति अस्येति प्रतिभानवान् । सर्वेषां लोकानां प्रियः सर्वलोकप्रियः । साध्नोति परकार्याणीति साधुः । नास्ति दीन आत्मा यस्य स अदीनात्मा ॥ १५ ॥

**भावार्थः**—रामः निखिलागममर्मविज्ञः स्मरणशक्तिशाली प्रत्युत्पन्नमतिः सकलजनरञ्जकः सज्जनः तेजस्वी सर्वदा उत्साहसम्पन्नः पण्डितश्चास्तीति भावः ॥ १५ ॥

**भाषार्थ**—राम सभी शास्त्रों के अर्थ और तत्त्व को जानने वाले, स्मरणशक्तिवाले, प्रतिभाशाली, सभी के प्रिय, परम उपकारी, उत्साही और व्यवहारकुशल भी हैं ॥ १५ ॥

**सर्वदाऽभिगतः सद्भिः समुद्रः इव सिन्धुभिः ।**
**आर्यः सर्वसमश्चैव सदैव प्रियदर्शनः ॥ १६ ॥**

**अन्वयः**—समुद्रः सिन्धुभिः इव ( सः रामः ) सर्वदा सद्भिः अभिगतः ( तथा ) आर्यः सर्वसमः एव च पुनः सदैव प्रियदर्शनः ( अस्ति ) ॥ १६ ॥

**व्याख्या**—समुद्रः = सागरः, सिन्धुभिः = सरिद्भिः इव, सर्वदा = सर्वस्मिन् काले, सद्भिः = साधुभिः, अभिगतः = सङ्गतः सेवितो वा, आर्यः = कुलीनः, सर्वसमः = समदर्शी चैव, सदा = सर्वदा, प्रियदर्शनः = प्रसन्नरूपः, रामोऽस्तीति भावः ॥ १६ ॥

**समासादिः**—सर्वैः समः सर्वसमः । प्रियं दर्शनं यस्य सः प्रियदर्शनः । सर्वस्मिन् काले इति सर्वदा ॥ १६ ॥

**भावार्थः**—रामः नदीभिः समुद्र इव सर्वदा सज्जनैः सेवितः महाकुलप्रसूतः समदर्शी, सर्वदा प्रसन्नरूपं चास्तीति भावः ॥ १६ ॥

**भाषार्थ**—श्रीराम नदियों से समुद्र के समान सर्वदा सज्जनों से सेवित ( सम्मिलित ) रहते हैं । कुलीन, सरल स्वभाव, समदर्शी और सदा प्रसन्न रहने वाले हैं ॥ १६ ॥

**स च सर्वगुणोपेतः कौशल्यानन्दवर्द्धनः ।**
**समुद्र इव गाम्भीर्ये धैर्येण हिमवानिव ॥ १७ ॥**



**अन्वयः**—सः ( रामः ) च सर्वगुणोपेतः कौशल्याऽऽनन्दवर्धनः, गाम्भीर्ये समुद्र इव धैर्येण हिमवान् इव वर्त्तते ॥ १७ ॥

**व्याख्या**—स च=रामश्च, सर्वगुणोपेतः=दयादाक्षिण्यादिसकलगुणसम्पन्नः, कौशल्यानन्दवर्द्धनः = निजजननीहर्षजनकः, गाम्भीर्ये = गम्भीरतायाम्, समुद्र इव = सागर इव, धैर्येण = धीरतया, हिमवान् = हिमालय इव, वर्तत इति शेषः ॥ १७ ॥

**समासादिः**—सर्वे च ते गुणाः सर्वगुणाः, तैः उपेतः सर्वगुणोपेतः । वर्धयतीति वर्द्धनः, आनन्दस्य वर्धनः आनन्दवर्धनः, कौशल्याया आनन्दवर्धनः कौशल्यानन्दवर्द्धनः । गम्भीरस्य भावः गाम्भीर्यं, तस्मिन् गाम्भीर्ये । धीरस्य भावः धैर्यं, तेन धैर्येण ॥ १७ ॥

**भावार्थः**—रामः सर्वगुणसम्पन्नः स्वमातुः कौशल्यायाः प्रीतिजनकः अस्ति । गम्भीरतायां समुद्रसमः धीरतायां हिमालय इव स्थिरो वर्त्तते अर्थात् यथा—समुद्रः स्वस्मिन् अगाधे जले विविधं रत्नजातं रक्षति तथैव रामोऽपि स्वगभीरे हृदये बहुविधं गोपनीयं समाचारसमूहं गोपायति तथा हिमालयो यथा पतितैः हिमैरपि निर्विकारो दृश्यते तथैव रामोऽपि प्रत्युपस्थितैरनेकैः कठिनकार्यैरपि निर्विकारस्तिष्ठतीति भावः ॥ १७ ॥

**भाषार्थ**—राम दया-दाक्षिण्यादि सभी गुणों से सम्पन्न हैं । अपनी माता कौशल्या को आनन्द देने वाले हैं । समुद्र के समान गम्भीर और हिमालय की तरह स्थिर हैं ॥ १७ ॥

**विष्णुना सदृशो वीर्ये सोमवत्प्रियदर्शनः ।**
**कालाग्निसदृशः क्रोधे क्षमया पृथिवीसमः ॥ १८ ॥**

**अन्वयः**—वीर्ये विष्णुना सदृशः, सोमवत् प्रियदर्शनः, क्रोधे कालाग्निसदृशः, क्षमया पृथिवीसमः ( अस्ति ) ॥ १८ ॥

**व्याख्या**—वीर्ये = पराक्रमे, सङ्ग्रामादिसमये, विष्णुना सदृशः=नारायणेन तुल्यः, सोमवत् = चन्द्रवत्, प्रियदर्शनः = मधुरमूर्तिः क्रोधे = कोपे, कालाग्निसदृशः = प्रलयानलतुल्यः, क्षमया = शान्त्या, पृथिवीसमः = धरणीसदृशः, रामोऽस्तीति शेषः ॥ १८ ॥

**समासादिः**—सोम इव सोमवत् । प्रियं दर्शनं यस्य सः प्रियदर्शनः । कालस्य अग्निः कालाग्निः, कालाग्निना सदृशः कालाग्निसदृशः । पृथिव्या समः पृथिवीसमः ॥ १८ ॥

**भावार्थः**—रामो विक्रमे सङ्ग्रामावसरे विष्णुना तुल्यः चन्द्रमा इव सर्वाह्लादजनकश्चास्ति। क्रोधावसरे प्रलयकालीनवह्नितुल्यः पृथ्वीसमश्च शान्तोऽस्तीति भावः। यथा देवविजयिनो दैत्या विष्णुना नश्यन्ते तथैव देवदुर्जया अपि दानवा रामेण पराजीयन्ते। यथा प्रत्यहं दृष्टमपि चन्द्रबिम्बं जना सर्वदा सस्नेहं पश्यन्त्येव तथैव दृष्टमपि रामचन्द्रं जना भूयो भूयः सस्पृहं पश्यन्त्येव। यथा प्रलयकालेऽग्निः सर्वाणि वस्तूनि सहसा भस्मसात्कुरुते तथैव रामः प्रतिपक्षिणं क्षणेनैव नाशयति। यथा वा पृथ्वी स्वोत्खननकारिणामपि न कमपि प्रतिकारं कुरुते तथैव रामोऽपि स्वसुखनिरपेक्षः सन् सर्वं सहर्षं सहते इति भावः॥ १८॥

**भाषार्थ**—राम, भगवान् विष्णु के समान पराक्रमी और चन्द्रमा के समान प्रियदर्शन हैं। युद्ध में क्रोध के समय प्रलयकाल की अग्नि के समान भयङ्कर और सहनशीलता में पृथ्वी के समान हैं॥ १८॥

**धनदेन समस्त्यागे सत्ये धर्म इवापरः।**

**अन्वयः**—त्यागे धनदेन समः, सत्ये अपरः धर्म इव (स हि रामो विद्यत इति शेषः)।

**व्याख्या**—त्यागे=धनादिदाने, धनदेन=कुबेरेण, समः=तुल्यः, सत्ये=सत्यपालने, अपरः=द्वितीयः, धर्मराज इव, रामोऽस्तीति शेषः।

**भावार्थः**—रामो याचकानां कृते दानकरणे कुबेरतुल्यः प्राणिनां रक्षणे च द्वितीयो धर्मराज इव वर्तते इति भावः।

**भाषार्थ**—रामचन्द्रजी दान करने में तो धनेश कुबेर के समान दानी और सत्यपालन में दूसरे धर्मराज के समान हैं।

**(इति बालकाण्ड-कथासारः।)**

**तमेवं गुणसम्पन्नं रामं सत्यपराक्रमम्॥ १९॥**
**ज्येष्ठं ज्येष्ठगुणैर्युतं प्रियं दशरथः सुतम्।**
**प्रकृतीनां हितैर्युक्तं प्रकृतिप्रियकाम्यया॥ २०॥**
**यौवराज्येन संयोक्तुमैच्छत् प्रीत्या महीपतिः।**

**अन्वयः**—महीपतिः दशरथः सत्यपराक्रमं ज्येष्ठं ज्येष्ठगुणैः युक्तम्, प्रकृतीनां हितैः युक्तम्, एवं गुणसम्पन्नं प्रियं सुतं तं रामं प्रकृतिप्रियकाम्यया प्रीत्या यौवराज्येन संयोक्तुम् ऐच्छत्॥ १९-२०॥

**व्याख्या**—महीपतिः=भूपालः, दशरथः=दशरथनामा नृपतिः, सत्यपराक्रमम्=अमोघविक्रमम्, ज्येष्ठम्=पुत्रचतुष्टयमध्ये प्रथमम्, ज्येष्ठगुणैः=सर्वाधिकश्लाघ्यगुणैः, युक्तम्=सहितम्, प्रकृतीनां=प्रजानाम्, हितैः=हितकरैः उपायैः,



युक्तं=सहितम्, एवम्=एवंविधम्, गुणसम्पन्नं=शौर्यौदार्यगाम्भीर्यादिगुणगणगरिष्ठं, प्रियं=प्रेमपात्रं, सुतं=पुत्रं, तं=पूर्वोक्तम्, रामं=रामचन्द्रम्, प्रकृतिप्रियकाम्यया=प्रजाहितकामनया, प्रीत्या=प्रेम्णा, यौवराज्येन संयोक्तुम्=युवराजं कर्तुम्, ऐच्छत्=अभिलषितवान्॥ १९-२०॥

**समासादिः**—मह्याः पतिः महीपतिः। दशसु दिक्षु अप्रतिहतो रथो यस्य स दशरथः। सत्यः पराक्रमो यस्य सः सत्यपराक्रमः, तं सत्यपराक्रमम्। ज्येष्ठाश्च ते गुणा ज्येष्ठगुणाः, यद्वा ज्येष्ठस्य गुणा ज्येष्ठगुणाः, तैः ज्येष्ठगुणैः। प्रियस्य काम्या प्रियकाम्या, प्रकृतीनां प्रियकाम्या प्रकृतिप्रियकाम्या, तया प्रकृतिप्रियकाम्यया। युवा चासौ राजः युवराजः, तस्य भावः यौवराज्यं, तेन यौवराज्येन॥ १९-२०॥

**भावार्थः**—महाराजो दशरथः दृढप्रतिज्ञं सर्वपुत्रेषु ज्येष्ठं ज्येष्ठगुणसम्पन्नं प्रजाकल्याणकारकं शौर्यौदार्यगाम्भीर्यादिगुणसम्पन्नं प्रियं पुत्रं रामं प्रजाकल्याणकारककामनया युवराजं कर्तुमभिलषितवानिति भावः॥ १९-२०॥

**भाषार्थ**—महाराज दशरथ ने दृढ़प्रतिज्ञ, सभी पुत्रों में ज्येष्ठ, उत्तम गुण वाले, प्रजाओं के उपकार में तत्पर, शौर्य, औदार्य आदि गुणों से विभूषित, अपने प्रिय पुत्र रामचन्द्रजी को प्रजा के कल्याण की कामना से प्रसन्नतापूर्वक युवराज बनाने की इच्छा प्रकट की॥ १९-२०॥

**तस्याभिषेकसम्भारान् दृष्ट्वा भार्याऽथ कैकेयी॥ २१॥**
**पूर्वं दत्तवरा देवी वरमेनमयाचत।**
**विवासनं च रामस्य भरतस्याभिषेचनम्॥ २२॥**

**अन्वयः**—अथ पूर्वं दत्तवरा भार्या देवी कैकेयी तस्य अभिषेकसम्भारान् दृष्ट्वा रामस्य विवासनं भरतस्य अभिषेचनं च एनं वरम् अयाचत॥ २१-२२॥

**व्याख्या**—अथ=अनन्तरं, पूर्वं=प्रथमं, दत्तवरा=अर्पिताभिलषितवरद्वया, भार्या=जाया, दशरथस्य मध्यमा पत्नी, कैकेयी=केकयराजपुत्री, तस्य=रामस्य, अभिषेकसम्भारान्=दध्यक्षतदूर्वाफलपुष्पच्छत्रचामरादीन् यौवराज्याभिषेकोपकरणानि, दृष्ट्वा=अवलोक्य, मन्थराभिधादासीवचनात् स्वार्थान्धतया पूर्वं देवासुरसङ्ग्रामे स्वीकृतवरद्वयं स्मृत्वा प्रसन्नमनसा, रामस्य=कौशल्यापुत्रस्य, विवासनं='रामश्चतुर्दशवर्षाणि यावत् राज्यं विहाय वने वसतु' इत्येवंरूपं वनप्रवासनम्, राज्यादुद्वासनम् भरतस्य=स्वपुत्रस्य, अभिषेचनम्=यौवराज्याभिषेचनं च, एनम्=दशरथं प्रति, वरं=मनोरथम्, अयाचत=प्रार्थितवती॥ २१-२२॥

**समासादिः**—केकयस्य राज्ञोऽपत्यं स्त्री कैकेयी । अभिषेकस्य सम्भाराः अभिषेकसम्भाराः, तान् अभिषेकसम्भारान् । दत्तौ वरौ यस्यै सा दत्तवरा ॥२१-२२॥

**भावार्थः**—अथ देवासुरसङ्ग्रामे लब्धवरद्वया दशरथस्य क्वचन[1] मध्यमा कनीयसी पत्नी कैकेयी रामस्य यौवराज्याभिषेकार्थमाहृतान् द्रव्यसमूहान् विलोक्य 'रामश्चतुर्दशवर्षपर्यन्तं वने निवसतु, भरतश्च युवराजो भवतु'—इति वरद्वयं स्वपतिं राजानं दशरथं प्रति याचितवती ॥ २१–२२ ॥

**भाषार्थ**—इसके बाद देवासुर-संग्राम के समय दो वर पाने का वचन प्राप्त की हुई कैकेयी ने राम को युवराज बनाने के लिए एकत्रित अभिषेक सामग्री को देखकर अपनी दाई मन्थरा के बार-बार समझाने पर अपने पति राजा दशरथ से दो वर माँगे । प्रथम यह कि राम चौदह वर्ष वन चले जाये और दूसरा यह कि भरत युवराज बनाया जाय ॥ २१–२२ ॥

**स सत्यवचनाद्राजा धर्मपाशेन संयतः ।**
**विवासयामास सुतं रामं दशरथः प्रियम् ॥ २३ ॥**

**अन्वयः**—सत्यवचनात् धर्मपाशेन संयतः ( सन् ) सः राजा दशरथः प्रियं सुतं रामं विवासयामास ॥ २३ ॥

**व्याख्या**—सत्यवचनात्=सत्यभाषणव्रतात्, धर्मपाशे=धर्मबन्धनेन, संयतः=बद्धः, सः=पूर्वोक्तः, राजा दशरथः=नृपो दशरथः, प्रियं=प्राणेभ्योऽपि प्रेमभाजनम्, सुतम्=पुत्रम्, रामं=रामचन्द्रम्, विवासयामास=वनं प्रेषयामास ॥ २३ ॥

**समासादिः**—सत्यं चैतद् वचनं सत्यवचनं, तस्मात् सत्यवचनात् । धर्म एव पाशः धर्मपाशः, तेन धर्मपाशेन ॥ २३ ॥

**भावार्थः**—सत्यवादी राजा दशरथः धर्मबन्धनेन पूर्वाङ्गीकृतवरदानद्वयेन विवशीभूतः प्रियपुत्रं रामं वने निर्वासयामासेति भावः ॥ २३ ॥

**भाषार्थ**—सत्यवचन पालन करने के कारण पहले दो वरदान देने के लिए प्रतिज्ञाबद्ध राजा दशरथ ने अपने प्रिय पुत्र राम को वन भेज दिया ॥ २३ ॥

**स जगाम वनं वीरः प्रतिज्ञामनुपालयन् ।**
**पितुर्वचननिर्देशात् कैकेय्याः प्रियकारणात् ॥ २४ ॥**

---

१. कैकेय्याः कनीयस्त्वे प्रमाणं तु शृङ्गवेरपुरतः सुमन्त्रप्रत्यावर्त्तनसमये रामोक्तिरेव—'नगरीं त्वां शतं दृष्ट्वा जननी मे यवीयसी ।
कैकेयी प्रत्ययं गच्छेदिति रामो वनं गतः ॥' अ० का० ३२।६१



**अन्वयः**—वीरः सः रामः कैकेय्याः प्रियकारणात् पितुः वचननिर्देशात् प्रतिज्ञाम् अनुपालयन् सन् वनं जगाम ॥ २४ ॥

**व्याख्या**—वीरः=पराक्रमी, सः=रामः, कैकेय्याः=कनीयस्या विमातुः, प्रियकारणात्=प्रीतिहेतोः, पितुः=जनकस्य दशरथस्य, वचननिर्देशात्=आज्ञावचनात्, प्रतिज्ञां=पितुः प्रतिज्ञां, देवासुरसङ्ग्रामे कैकेय्या प्रदत्तां सन्धाम् 'चतुर्दशवर्षपर्यन्तं वने वत्स्यामि' इति स्वां प्रतिश्रुतिं वा, अनुपालयन्=संरक्षन्, वनं=विपिनम्, जगाम=ययौ ॥ २४ ॥

**समासादिः**—वचनेन निर्देशः वचननिर्देशः, तस्मात् वचननिर्देशात् । प्रियमेव कारणं प्रियकारणं, तस्मात् प्रियकारणात् ॥ २४ ॥

**भावार्थः**—पराक्रमी रामः स्वजनकस्य प्रतिज्ञां संरक्षणाय पितुर्दशरथस्य आज्ञापालनार्थं विमातुश्च कैकेय्याः प्रीतिसम्पादनार्थं च वनं जगाम ॥२४॥

**भाषार्थ**—वे वीर राम अपने पिता दशरथ की प्रतिज्ञा की रक्षा करने के निमित्त प्रेमबन्धन में पड़े हुए पिता की आज्ञा से अपनी विमाता कैकेयी की अभीष्ट-सिद्धि के लिए वन की ओर चल दिये ॥ २४ ॥

**तं व्रजन्तं प्रियो भ्राता लक्ष्मणोऽनुजगाम ह ।**
**स्नेहाद्विनयसम्पन्नः सुमित्रानन्दवर्द्धनः ॥ २५ ॥**
**भ्रातरं दयितो भ्रातुः सौभ्रात्रमनुदर्शयन् ।**

**अन्वयः**—भ्रातुः दयितः विनयसम्पन्नः सुमित्राऽऽनन्दवर्द्धनः भ्राता लक्ष्मणः सौभ्रात्रम् अनुदर्शयन् व्रजन्तं तं भ्रातरं स्नेहाद् अनुजगाम ह ॥ २५ ॥

**व्याख्या**—भ्रातुः=रामस्य, दयितः=प्रियः (प्रीतिमान्), विनयसम्पन्नः=विनययुक्तः, सुमित्रानन्दवर्द्धनः=निजजननीहर्षजनकः, भ्राता=अनुजः, लक्ष्मणः=शत्रुघ्नाग्रजः, सौभ्रात्रम्=सहोदरसौजन्यम्, अनुदर्शयन्=प्रकाशयन्, व्रजन्तं=वनं गच्छन्तम्, तं भ्रातरम्=अग्रजं श्रीरामं, स्नेहात्=प्रेम्णः, अनुजगाम=अनुययौ, ह इति पादपूरणे, यद्वा ह इति सुप्रसिद्धम् ॥ २५ ॥

**समासादिः**—सुमित्राया आनन्दं वर्धयतीति सुमित्रानन्दवर्द्धनः । विनयेन सम्पन्नः विनयसम्पन्नः । सुभ्रातः भावः सौभ्रात्रम् ॥ २५ ॥

**भावार्थः**—श्रीरामस्य परमः प्रियो विनयशीलः स्वमातुः सुमित्राया मोदजनकः भ्रातृस्नेहवशवर्ती लक्ष्मणः भ्रातृसौजन्यं प्रदर्शयन् वनं गच्छन्तं श्रीरामम् अनुजगाम इति भावः ॥ २५ ॥

**भाषार्थ**—राम के परमप्रिय, अतिविनीत, अपनी माता सुमित्रा को आनन्द देने वाले लक्ष्मण भी भ्रातृस्नेह दिखाते हुए राम के पीछे-पीछे वन को चले ॥२५॥

**रामस्य दयिता भार्या नित्यं प्राणसमा हिता ॥ २६ ॥**
**जनकस्य कुले जाता देवमायेव निर्मिता ।**
**सर्वलक्षणसम्पन्ना नारीणामुत्तमा वधूः ॥ २७ ॥**
**सीताऽप्यनुगता रामं शशिनं रोहिणी यथा ।**
**पौरैरनुगतो दूरं पित्रा दशरथेन च ॥ २८ ॥**

**अन्वयः**—रामस्य दयिता नित्यं प्राणसमा हिता जनकस्य कुले जाता, देवमाया इव निर्मिता सर्वलक्षणसम्पन्ना नारीणाम् उत्तमा वधूः सीता अपि रोहिणी शशिनं यथा ( अनुयाति तथा ) रामम् अनुगता । पौरैः पित्रा दशरथेन च दूरम् अनुगतः ॥ २६-२८ ॥

**व्याख्या**—रामस्य = रामचन्द्रस्य, दयिता=प्रिया, भार्या = जाया, नित्यं= सदा, प्राणसमा = जीवनसदृशी, हिता=हितकारिणी, जनकस्य = विदेहराजस्य, सीरध्वजस्य, कुले = वंशे, जाता = उत्पन्ना, देवमाया = देवनिर्मितमाया, इव= यथा, निर्मिता=रचिता, सर्वलक्षणसम्पन्ना=सामुद्रिकशास्त्रोक्तसकललक्षणलक्षिता, नारीणाम् = स्त्रीणाम्, उत्तमा=श्रेष्ठा, वधूः = दशरथस्नुषा, सीता अपि=जानकी अपि, रोहिणी = रोहिणी नाम्नी दक्षकन्या चन्द्रपत्नी ( नक्षत्रविशेषः ), शशिनं = चन्द्रमसं, यथा = इव, रामं = स्वपतिं, वनं = विपिनम्, अनुगता = सहैव प्रस्थिता । पौरैः = अयोध्यावासिभिः जनैः, पित्रा=जनकेन, दशरथेन = पङ्क्तिरथेन, च = अपि, दूरं = दीर्घमध्वानम्, अनुगतः = अनुसृतः ॥ २६-२८ ॥

**समासादिः**—सर्वाणि च तानि लक्षणानि सर्वलक्षणानि, तैः सम्पन्ना सर्वलक्षणसम्पन्ना । प्राणैः समा प्राणसमा । पुरे भवाः पौराः, तैः पौरैः ॥२६-२८॥

**भावार्थः**—रामस्य प्राणतुल्या हितकारिणी जनककुलोत्पन्ना देवानामपि मोहिनी सर्वलक्षणसंयुक्ता स्त्रीरत्नं सीता अपि रोहिणी चन्द्रमसमिव रामम् अनुजगाम । अयोध्यावासिनो नरा दशरथश्चापि किञ्चिद् दूरं गताः ॥ २६-२८ ॥

**भाषार्थ**—राजा जनक के कुल में उत्पन्न देवताओं की माया के समान सुन्दरी, सदा प्राण के समान कल्याण करने वाली, सभी शुभ लक्षणों से संयुक्त, स्त्रियों में श्रेष्ठ, राम की प्यारी पत्नी, महाराज दशरथ की पुत्रवधू सीता भी चन्द्रमा के पीछे रोहिणी के समान राम के पीछे-पीछे वन को चल पड़ी । उस समय अयोध्या-निवासी मनुष्यों ने स्वयं साथ जाकर एवं पिता दशरथ ने अपना सारथि भेजकर कुछ दूर तक उनका अनुसरण किया ॥ २६-२८ ॥

**शृङ्गवेरपुरे सूतं गङ्गाकूले व्यसर्जयत् ।**
**गुहमासाद्य धर्मात्मा निषादाधिपतिं प्रियम् ॥ २९ ॥**



**अन्वयः**—धर्मात्मा रामः गङ्गाकूले शृङ्गवेरपुरे प्रियं निषादाधिपतिं गुहम् आसाद्य सूतं व्यसर्जयत् ॥ २९ ॥

**व्याख्या**—धर्मात्मा = धर्मशीलो रामः, गङ्गाकूले = भागीरथीतीरे, शृङ्गवेरपुरे = शृङ्गवेरपुरनामके ग्रामे, प्रियं = सुहृदं, निषादाधिपतिं = निषादजातिस्वामिनम्, गुहं = गुहनामकम्, आसाद्य = प्राप्य, सूतं = रथवाहकं सारथिं सुमन्त्रं, व्यसर्जयत् = परावर्तयत् ॥ २९ ॥

**समासादिः**—गङ्गायाः कूलं गङ्गाकूलं, तस्मिन् गङ्गाकूले । निषादानाम् अधिपतिः निषादाधिपतिः, तं निषादाधिपतिम् ॥ २९ ॥

**भावार्थः**—धर्मशीलो रामः गङ्गातीरे शृङ्गवेरपुरनामकग्रामे मित्रं निषादराजं गुहं प्राप्य रथचालकं सुमन्त्रं निवर्तयामासेति भावः ॥ २९ ॥

**भाषार्थ**—धर्मात्मा राम ने गङ्गा नदी के तट पर शृङ्गवेरपुर में परमस्नेही निषादराज गुह के पास पहुँच कर सारथि सुमन्त्र को अयोध्या लौटा दिया ॥ २९ ॥

**गुहेन सहितो रामो लक्ष्मणेन च सीतया ।**
**ते वनेन वनं गत्वा नदीस्तीर्त्वा बहूदकाः ॥ ३० ॥**

**अन्वयः**—गुहेन लक्ष्मणेन सीतया च सहितः रामः ( इति ) ते, वनेन वनं गत्वा, बहूदकाः नदीः तीर्त्वा ( चित्रकूटमनुप्राप्य तत्र सुखं न्यवसन्निति अग्रिमेण सह सम्बन्धः ) ॥ ३० ॥

**व्याख्या**—गुहेन = निषादाधिपतिना, लक्ष्मणेन = सुमित्रातनयेन, सीतया = स्वभार्यया जानक्या च, सहितः = संयुक्तः, रामः = रामचन्द्रः इति, ते = चत्वारो जनाः, वनेन वनं=एकस्मात् वनात् अन्यद् वनं, गत्वा=प्राप्य, बहूदकाः = प्रभूतजलाः, नदीः = सरितः, तीर्त्वा = उत्तीर्य, चित्रकूटे सुखेन न्यवसन्निति परेणान्वयः ॥ ३० ॥

**समासादिः**—बहूनि उदकानि यासु ताः बहूदकाः, ता बहूदकाः ॥ ३० ॥

**भावार्थः**—गुहलक्ष्मणसीताभिः सह श्रीरामः एकस्माद्वनाद्वनान्तरं प्राप्य अगाधजला नदीः उत्तीर्य च ( चित्रकूटे सुखेन निवासं चकारेति भावः ) ॥३०॥

**भाषार्थ**—गुह, लक्ष्मण और सीता के साथ श्रीराम एक वन से दूसरे वनों को लाँघते हुए और गहरी गङ्गा नदी को पार करके ( वहीं गुह को छोड़कर भरद्वाजमुनि के आश्रम पर जा पहुँचे ) ॥ ३० ॥

**चित्रकूटमनुप्राप्य भरद्वाजस्य शासनात् ।**
**रम्यमावसथं कृत्वा रममाणाः वने त्रयः ॥ ३१ ॥**

**देवगन्धर्वसङ्काशास्तत्र ते न्यवसन्सुखम् ।**

**अन्वयः**—भरद्वाजस्य शासनात् चित्रकूटम् अनुप्राप्य, तत्र रममाणाः, देवगन्धर्वसङ्काशाः ते त्रयः रम्यम् आवसथं कृत्वा, सुखं न्यवसन् ॥ ३१ ॥

**व्याख्या**—भरद्वाजस्य=भरद्वाजनामकमुनेः, शासनात्=उपदेशात्, चित्रकूटं=चित्रकूटनामकं पर्वतम्, अनुप्राप्य=लब्ध्वा, तत्र=चित्रकूटे, रममाणाः=विहरन्तः, देवगन्धर्वसङ्काशाः=देवगन्धर्वसदृशाः, ते त्रयः=सीतारामलक्ष्मणाः, रम्यं=मनोहरम्, आवसथं=पर्णकुटीरं, कृत्वा=निर्माय, सुखं=स्वच्छन्दं, न्यवसन्=निवासं कृतवन्तः ॥ ३१ ॥

**समासादिः**—चित्राणि ( नानावर्णानि ) कूटानि शिखराणि वर्तन्ते यस्मिन् स चित्रकूटः, तं चित्रकूटम् । देवगन्धर्वसङ्काशाः—देवाश्च गन्धर्वाश्चेति देवगन्धर्वाः, तैः सङ्काशा देवगन्धर्वसङ्काशाः ॥ ३१ ॥

**भावार्थः**—ते त्रयः सीतारामलक्ष्मणः भरद्वाजस्य मुनेराज्ञया चित्रकूटे सुन्दरं निवासगृहं निर्माय, देवगन्धर्ववत् सुखपूर्वकं निवासं चक्रुरिति भावः ॥ ३१ ॥

**भाषार्थ**—वे तीनों ( राम, लक्ष्मण और सीता ) भरद्वाज मुनि की आज्ञा से चित्रकूट पर्वत पर सुन्दर पर्णकुटी बनाकर देवता एवं गन्धर्वों के समान सुखपूर्वक रहने लगे ॥ ३१ ॥

**चित्रकूटं गते रामे पुत्रशोकातुरस्तदा ॥ ३२ ॥**
**राजा दशरथः स्वर्गं जगाम विलपन् सुतम् ।**

**अन्वयः**—रामे चित्रकूटं गते ( सति ) पुत्रशोकातुरः राजा दशरथः सुतं विलपन् स्वर्गं जगाम ॥ ३२ ॥

**व्याख्या**—रामे=रामचन्द्रे, चित्रकूटं=चित्रकूटपर्वतम्, गते=प्राप्ते सति, तदा=तस्मिन् काले, पुत्रशोकातुरः=सुतशोकसन्तप्तः, राजा दशरथः=दशरथनृपतिः, सुतं=पुत्रं रामं, विलपन्='हा राम, हा राम !' इत्येवं विलापं कुर्वन्. स्वर्गं=स्वर्लोकं, जगाम=गतवानित्यर्थः ॥ ३२ ॥

**समासादिः**—पुत्रस्य शोकः पुत्रशोकः, तेन आतुरः पुत्रशोकातुरः ॥ ३२ ॥

**भावार्थः**—रामे चित्रकूटपर्वतं प्रत्युपस्थिते सुतशोकसन्तप्तो राजा दशरथः 'हा राम, हा राम !' इत्येवं विलापं कुर्वन् प्राणान् तत्याजेति भावः ॥ ३२ ॥

**भाषार्थ**—राम के चित्रकूट पर्वत पर पहुँच जाने के बाद पुत्र के विरहजन्य शोक से सन्तप्त होकर महाराज दशरथ ने 'हा राम ! 'हा राम !' इस प्रकार विलाप करते हुए अपने प्राणों को त्याग दिया ॥ ३२ ॥



**गते तु तस्मिन् भरतो वसिष्ठप्रमुखैर्द्विजैः ॥ ३३ ॥**
**नियुज्यमानो राज्याय नैच्छद्राज्यं महाबलः ।**

**अन्वयः**—तस्मिन् गते तु वसिष्ठप्रमुखैः द्विजैः राज्याय नियुज्यमानः महाबलः भरतः राज्यं न ऐच्छत् ॥ ३३ ॥

**व्याख्या**—तस्मिन्=दशरथे, गते=पञ्चतत्त्वं प्राप्ते सति, यद्वा तस्मिन् रामे वनं गते सति, वसिष्ठप्रमुखैः=वसिष्ठप्रधानैः, द्विजैः=ब्राह्मणैः, राज्याय=राज्यं कर्तुं, नियुज्यमानः=प्रेर्यमाणः, महाबलः=राज्यभारवहनसमर्थोऽपि, भरतः=कैकेयीतनयः, राज्यं=राज्यभारं, न ऐच्छत्=नहि चकमे ॥ ३३ ॥

**समासादिः**—वसिष्ठः प्रमुखो येषां ते वसिष्ठप्रमुखाः, तैर्वसिष्ठप्रमुखैः । द्वाभ्यां जन्मसंस्काराभ्यां जायन्ते इति द्विजाः, तैः द्विजैः । महत् बलं यस्य स महाबलः ।

**भावार्थः**—दशरथे मृते रामे वनं गते च वसिष्ठादिभिः राज्यरक्षकैः ब्राह्मणैः राज्यभारं वोढुं प्रेर्यमाणोऽपि भरतः राज्यं नैच्छदिति भावः ॥ ३३ ॥

**भाषार्थ**—महाराज दशरथ के मर जाने पर ( या राम के वन चले जाने पर ) वसिष्ठ प्रभृति राज्यरक्षक ब्राह्मणों के द्वारा राज्य करने के लिए आग्रह करने पर सर्वसमर्थ होते हुए भी भरत ने राज्य करना स्वीकार नहीं किया ॥

**स जगाम वनं वीरो रामपादप्रसादकः ॥ ३४ ॥**
**गत्वा तु स महात्मानं रामं सत्यपराक्रमम् ।**
**अयाचद् भ्रातरं राममार्यभावपुरस्कृतः ॥ ३५ ॥**
**'त्वमेव राजा धर्मज्ञ' इति रामं वचोऽब्रवीत् ।**

**अन्वयः**—वीरः रामपादप्रसादकः स वनं जगाम, आर्यभावपुरस्कृतः सः वनं गत्वा महात्मानं सत्यपराक्रमं भ्रातरं रामम् अयाचत् (किमयाचत् ?) 'त्वम् एव धर्मज्ञः राजा' इति वचः रामम् अब्रवीत् ॥ ३४-३५ ॥

**व्याख्या**—वीरः=महाबलशाली, रामपादप्रसादकः=रामचरणसेवकः, सः=भरतः, वनं=चित्रकूटं, जगाम=ययौ, आर्यभावपुरस्कृतः=श्रेष्ठभावयुक्तः विनीतभावः, सः=भरतः, गत्वा=चित्रकूटं प्राप्य, महात्मानम्=उदारचरितं, सत्यपराक्रमं=सत्यप्रतिज्ञम्, भ्रातरम्=अग्रजं, रामं=रामचन्द्रम्, अयाचत्=प्रार्थयामास, त्वमेव=भवानेव, राजा=राजा भवितुं योग्यः, धर्मज्ञः=धर्मवेत्ता (असि), इति=एतत्, वचः=वचनं, रामं=स्वाग्रजम्, अब्रवीत्=उवाच ॥ ३४-३५॥

**समासादिः**—धर्मं जानातीति धर्मज्ञः । रामस्य पादौ प्रसादयतीति रामपादप्रसादकः । सत्यः पराक्रमो यस्य सः सत्यपराक्रमः, तं सत्यपराक्रमम् । आर्याणां

भावः आर्यभावः, तेन पुरस्कृतः आर्यभावपुरस्कृतः। महान् आत्मा यस्य स महात्मा, तं महात्मानम् ॥ ३४–३५ ॥

**भावार्थः**—रामचरणानुरागी महाबलिष्ठो भरतो ज्येष्ठं मर्यादापुरःसरं रामं प्रसादयितुं चित्रकूटं गत्वा अमोघपराक्रमं रामं प्रार्थयद् यत्—धर्मज्ञः त्वमेव राज्यभारवहनयोग्योऽसि । अतस्त्वमेव राजा भवेति भावः ॥ ३४-३५ ॥

**भाषार्थ**—रामसेवक महाबली भरत ने विनीत भाव से चित्रकूट पर जाकर सत्यप्रतिज्ञ राम से राज्य करने के लिए प्रार्थना करते हुए विनीत भाव से कहा कि आप धर्म को जाननेवाले हैं । इसलिए आप ही राजा बनने के योग्य हैं ॥ ३४-३५ ॥

**रामोऽपि परमोदारः सुमुखः सुमहायशाः ॥ ३६ ॥**
**न चैच्छत् पितुरादेशाद्राज्यं रामो महाबलः ।**
**पादुके चास्य राज्याय न्यासं दत्त्वा पुनः पुनः ॥ ३७ ॥**
**निवर्त्तयामास ततो भरतं भरताग्रजः ।**

**अन्वयः**—परमोदारः सुमुखः सुमहायशाः अपि पितुः आदेशाद् राज्यं न च ऐच्छत्, ( अपि तु ) महाबलः भरताग्रजः रामः अस्य राज्याय न्यासं पादुके दत्त्वा ततः पुनः पुनः भरतं निवर्त्तयामास ॥ ३६–३७ ॥

**व्याख्या**—( किन्तु ) परमोदारः=अत्युदारः स्वार्थहीनः, सुमुखः=प्रसन्नाननः, सुमहायशाः=प्रशस्तकीर्तिमान्, रामः=कौशल्यानन्दनः अपि, पितुः=दशरथस्य, आदेशात्=निर्देशात्, राज्यं=राज्याधिकारं, न च ऐच्छत्=नाभिलषितवान् । महाबलः=अतिबलशाली, भरताग्रजः=भरतज्येष्ठभ्राता, रामः=रामचन्द्रः, राज्याय=राज्यं कर्तुं, अस्य=भरतस्य, पादुके=काष्ठचरणपादुके, न्यासम्=निक्षेपं स्वप्रतिनिधिस्वरूपं वा, दत्त्वा=अर्पयित्वा, ततः=चित्रकूटात्, पुनः पुनः=भूयो भूयः, भरतम्=कैकेयीतनयम्, निवर्तयामास=परावर्तयामास ॥३६-३७॥

**समासादिः**—सुमहत् यशो यस्य सः सुमहायशाः । परमश्चासौ उदारः परमोदारः । सुष्ठु मुखः यस्य सः सुमुखः । महत् बलं यस्य स महाबलः । अग्रे जातः अग्रजः, भरतस्याग्रजः भरताग्रजः ॥ ३६-३७ ॥

**भावार्थः**—परमोदारो रामः पितुर्जनकस्य राज्ञो दशरथस्याज्ञापालनार्थं राज्यं नैच्छत्, किन्तु भरताय स्वचरणपादुके स्वप्रतिनिधिस्वरूपं दत्त्वा तं चित्रकूटात् निवर्तयामासेति भावः ॥ ३६-३७ ॥

**भाषार्थ**—अत्यन्त उदार प्रसन्नमुख राम ने पिता की आज्ञा का पालन



करने के लिये राज्य नहीं चाहा, किन्तु भरतजी को अपनी चरणपादुका देकर बार-बार समझाते हुए चित्रकूट से अयोध्या लौटा दिया ॥ ३६-३७ ॥

**स काममनवाप्यैव रामपादावुपस्पृशन् ॥ ३८ ॥**
**नन्दिग्रामेऽकरोद्राज्यं रामागमनकाङ्क्षया ।**

**अन्वयः**—सः कामम् अनवाप्य एव, रामपादौ उपस्पृशन्, नन्दिग्रामे रामागमनकाङ्क्षया राज्यम् अकरोत् ॥ ३८ ॥

**व्याख्या**—सः=भरतः, कामं=रामस्यानयनरूपमभिलाषम्, अनवाप्य=अप्राप्य एव, रामपादौ=रामचरणौ, उपस्पृशन्=प्रणमन्, नन्दिग्रामे=अयोध्यातो दक्षिणदिग्भागे वर्तमाने नन्दीग्रामनामके जनपदे, रामागमनकाङ्क्षया=रामप्रत्यागमनसमयप्रतीक्षया, राज्यम्=प्रजापालनम्, अकरोत्=कृतवान् ॥ ३८ ॥

**समासादिः**—रामस्य पादौ रामपादौ । रामस्यागमनं रामागमनं, तस्याकाङ्क्षा रामागमकाङ्क्षा, तया रामागमनकाङ्क्षया ॥ ३८ ॥

**भावार्थः**–भरतः बहुशः प्रयत्नं विधायापि स्वमनोरथविफलतां ज्ञात्वा रामस्य चरणपादुके अत्यादरेणादाय ताभ्यामेव राज्यकार्यं निवेदयन् अयोध्यातो दक्षिणदिग्वर्तमाने यावत्कालपर्यन्तं रामो वनान्नागमिष्यति तावत्कालमहमत्रैव स्थित्वा तदादेशेन सर्वं राज्यकार्यं सम्पादयिष्यामि, परं नाहमेकाकी अयोध्यां प्रवेक्ष्यामि, अपि तु रामलक्ष्मणाभ्यां सहैव चतुर्दशे वर्षे तत्र यास्यामि, इति विचारेण नन्दीग्रामनामके स्थाने स्थित्वा राज्यपालनं कृतवानिति भावः ॥ ३८ ॥

**भाषार्थ**—भरतजी अपना मनोरथ पूर्ण न होता हुआ देखकर राम की चरणपादुका को लेकर लौट आये और जब तक श्रीराम नहीं आयेंगे तब तक मैं भी अयोध्या में प्रवेश नहीं करूँगा, यह निश्चय कर राम की चरणपादुका से राज्य-कार्य निवेदन करते हुए नन्दीग्राम में राम के लौटने के समय की प्रतीक्षा करते हुए प्रजा का पालन करने लगे ॥ ३८ ॥

**( इति अयोध्याकाण्ड-कथासारः )**

**गते तु भरते श्रीमान् सत्यसन्धो जितेन्द्रियः ॥ ३९ ॥**
**रामस्तु पुनरालक्ष्य नागरस्य जनस्य च ।**
**तत्रागमनमेकाग्रो दण्डकान् प्रविवेश ह ॥ ४० ॥**

**अन्वयः**—भरते गते तु श्रीमान् सत्यसन्धः रामः तु तत्र नागरस्य जनस्य पुनः आगमनम् आलक्ष्य एकाग्रः सन् दण्डकान् प्रविवेश ह ॥ ३९–४० ॥

**व्याख्या**—भरते=कैकेयीपुत्रे, गते=चित्रकूटात् प्रस्थिते सति तु, श्रीमान्=

शोभावान्, सत्यसन्धः=सत्यप्रतिज्ञः, जितेन्द्रियः=वशीकृतेन्द्रियगणः, रामस्तु=रामोऽपि, तत्र=चित्रकूटे, नागरस्य जनस्य=अयोध्यानिवासिनो लोकस्य, चित्रकूटनिकटग्रामीणस्य जनसमूहस्य वा, पुनः=भूयः, आगमनम्=यातायातम् आलक्ष्य=सम्भाव्य, एकाग्रः=स्थिरलक्ष्यः, दण्डकान्=दण्डकारण्यानि, प्रविवेश=अन्तः प्राविशत् । ह इति प्रसिद्धौ ॥ ३९-४० ॥

**समासादिः**—सत्या सन्धा यस्य सः सत्यसन्धः । जितानि इन्द्रियाणि येन सः जितेन्द्रियः । नगरे भवः नागरस्तस्य नागरस्य । श्रीरस्ति यस्मिन् स श्रीमान् ।

**भावार्थः**—चित्रकूटात् प्रस्थिते भरते सत्यप्रतिज्ञो रामः अयोध्यानिवासिनो जनस्य चित्रकूटपार्श्ववर्तिनो ग्राम्यजनस्य वा पुनरागमनं सम्भाव्य एकाग्रं दण्डकारण्याभ्यन्तरं प्रविवेशेति भावः ॥ ३९-४० ॥

**भाषार्थ**—भरत के चित्रकूट से लौट जाने पर सत्यप्रतिज्ञ और जितेन्द्रिय राम, कहीं अयोध्यानिवासी या चित्रकूट के निकट के निवासी जनसमूह फिर न यहाँ आ जाये, यह सोचकर एकाग्र दण्डकारण्य में चले गये ॥ ३९-४० ॥

**प्रविश्य तु महारण्यं रामो राजीवलोचनः ।**
**विराधं राक्षसं हत्वा शरभङ्गं ददर्श ह ॥ ४१ ॥**
**सुतीक्ष्णञ्चाप्यगस्त्यं च अगस्त्यभ्रातरं तथा ।**

**अन्वयः**—राजीवलोचनः रामः तु महारण्यं प्रविश्य, विराधं राक्षसं हत्वा शरभङ्गं सुतीक्ष्णं च अगस्त्यम् अपि तथा अगस्त्यभ्रातरं च ददर्श ह ॥ ४१ ॥

**व्याख्या**—राजीवलोचनः=कमलनयनः, रामः=कौशल्यातनयः, महारण्यम्=दण्डकारण्यम्, प्रविश्य=अन्तर्गत्वा, विराधम्=विराधनामकं, राक्षसम्=निशाचरं, हत्वा=व्यापाद्य, शरभङ्गं सुतीक्ष्णं च मुनी अपि, तथा अगस्त्यम् अगस्त्यभ्रातरं=सुदर्शननामकं मुनिं च, ददर्श=दृष्टवान् । ह इति प्रसिद्धौ ॥४१॥

**समासादिः**—राजीवे इव लोचने यस्य स राजीवलोचनः । अगस्त्यस्य भ्रातरम् अगस्त्यभ्रातरम् । महद् अरण्यं महारण्यम् ॥ ४१ ॥

**भावार्थः**—कमलनयनो रामः दण्डकारण्यं प्रविश्य, विराधनामकं निशाचरं हत्वा शरभङ्गमुनिं अगस्त्यम् अगस्त्यभ्रातरं सुदर्शनमुनिं च ददर्शेति भावः ।४१।

**भाषार्थ**—कमलनयन राम ने दण्डकारण्य में जाकर विराध नामक राक्षस को मारा और शरभंग मुनि, सुतीक्ष्ण मुनि, अगस्त्य मुनि और अगस्त्य मुनि के भ्राता सुदर्शन आदि मुनियों के दर्शन किए ॥ ४१ ॥



**अगस्त्यवचनाच्चैव जग्राहैन्द्रं शरासनम् ।**
**रामस्तु परमप्रीतस्तूणी चाक्षयसायकौ ॥ ४२ ॥**

**अन्वयः**—परमप्रीतः रामः तु अगस्त्यवचनात् च एव ऐन्द्रं शरासनं अक्षयसायकौ तूणी च जग्राह ॥ ४२ ॥

**व्याख्या**—परमप्रीतः=अतिप्रसन्नः, रामः=रामचन्द्रस्तु, अगस्त्यवचनात्=अगस्त्यमुनिवाक्यात्, च एव=निश्चयेन, ऐन्द्रम्=इन्द्रसम्बन्धि, शरासनं=धनुः, अक्षयसायकौ=सदाबाणपूर्णौ, तूणी=इषुधी, च जग्राह=स्वीकृतवान् ॥४२॥

**समासादिः**—अगस्त्यस्य वचनम् अगस्त्यवचनं, तस्मात् अगस्त्यवचनात् । परमश्चासौ प्रीतः परमप्रीतः । अक्षयाः सायका ययोस्तौ अक्षयसायकौ । इन्द्रादागतम् ऐन्द्रम् । शरा अस्यन्ते क्षिप्यन्ते यस्मिन् तत् शरासनं, तत् शरासनम् ॥ ४२ ॥

**भावार्थः**—ऋषीणां दर्शनादुपदेशाच्चातिप्रसन्नो रामः अगस्त्यमुनेः आज्ञया इन्द्रसम्बन्धि धनुः सततबाणपूर्णौ तूणीरौ च गृहीतवानिति भावः ॥ ४२ ॥

**भाषार्थ**—दण्डकारण्य में विराध नामक राक्षस को मारकर अत्यन्त प्रसन्न राम ने अगस्त्यमुनि की आज्ञा से ही इन्द्र के धनुष तथा सदा बाणपूर्ण तूणीर ( तरकस ) को भी ग्रहण किया ॥ ४२ ॥

**वसतस्तस्य रामस्य वने वनचरैः सह ॥ ४३ ॥**
**ऋषयोऽभ्यागमन् सर्वे वधायासुररक्षसाम् ।**
**स तेषां प्रतिशुश्राव राक्षसानां तदा वने ॥ ४४ ॥**

**अन्वयः**—सर्वे ऋषयः वने वनचरैः सह वसतः तस्य रामस्य असुररक्षसां वधाय अभ्यागमन्, तदा सः वने राक्षसानां (वधं) तेषां प्रतिशुश्राव ॥४३-४४॥

**व्याख्या**—सर्वे=सकलाः, ऋषयः=मुनयः, शरभङ्गादयः, वने=विपिने, वनचरैः=वानप्रस्थैः मृगादिभिर्वा, सह=साकं, वसतः=वासं कुर्वतः, तस्य रामस्य=भरताग्रजस्य (स्थाने), असुररक्षसां=दानवपिशितासनानां, वधाय=विनाशाय, निवेदनार्थं असुराणां राक्षसानां च हननं कुरु इति प्रार्थयितुं वा, अभ्यागमन्=आगतवन्तः । तदा=तस्मिन् काले, सः=रामः, राक्षसानां=निशाचराणां वधं, तेषां=ऋषीणां ( ऋषिभ्यः ), प्रतिशुश्राव=प्रतिज्ञातवान् । ४३-४४ ।

**समासादिः**—वने चरन्तीति वनचरास्तैः वनचरैः । असुराः कबन्धादयः, रक्षांसि खरादयः, असुराश्च रक्षांसि चेति असुररक्षांसि, तेषां असुररक्षसाम् ॥

**भावार्थः**—तस्मिन् वने वनवासिभिः सह निवसतः रामस्य समीपे असुररक्षसां वधाय मुनयः समागत्य प्रार्थितवन्तः, रामेण च तेषां वधाय प्रतिज्ञा कृतेति भावः ॥ ४३-४४ ॥

**भावार्थ**—इन्द्रधनुष और अक्षय तूणीर ग्रहण करने के अनन्तर उस वन में वनवासियों के साथ रहते हुए रामजी के पास ऋषिलोग राक्षसों को मारने की प्रार्थना करने के लिये आये, तदनुसार राम ने उन राक्षसों को मारने की प्रतिज्ञा की ॥ ४३-४४ ॥

**प्रतिज्ञातश्च रामेण वधः संयति रक्षसाम् ।**
**ऋषीणामग्निकल्पानां दण्डकारण्यवासिनाम् ॥ ४५ ॥**

**अन्वयः**—रामेण अग्निकल्पानां दण्डकारण्यवासिनाम् ऋषीणां ( समीपे एव ) संयति रक्षसां वधः च प्रतिज्ञातः ॥ ४५ ॥

**व्याख्या**—रामेण=कौशल्यातनयेन, अग्निकल्पानां=वह्नितुल्यतेजोयुक्तानाम्, दण्डकारण्यवासिनां=दण्डकवननिवासिनाम्, ऋषीणां=मुनीनां (पुरत एव), संयति=सङ्ग्रामे, रक्षसां=खरादीनाम्, वधः=नाशः, प्रतिज्ञातः=प्रतिश्रुतः ॥४५॥

**समासादिः**—ईषदूना अग्नयः अग्निकल्पाः, तेषाम् अग्निकल्पानाम् । दण्डकारण्ये वस्तुं शीलं येषां ते दण्डकारण्यवासिनः, तेषां दण्डकारण्यवासिनाम् ॥

**भावार्थः**—अग्निसमानतेजःपुञ्जमूर्तीनाम् ऋषीणां समक्षं रामः 'युद्धे खरादीन् रक्षसान् हनिष्यामि' इति प्रतिज्ञातवानिति भावः ॥ ४५ ॥

**भावार्थ**—राम ने अग्निसदृश तेजस्वी दण्डकारण्य-निवासी ऋषियों के सामने प्रतिज्ञा की कि युद्ध में खर आदि राक्षसों को मैं अवश्य मारूँगा ॥४५॥

**तेन तत्रैव वसता जनस्थाननिवासिनी ।**
**विरूपिता शूर्पणखा राक्षसी कामरूपिणी ॥ ४६ ॥**

**अन्वयः**—तत्र एव वसता तेन जनस्थाननिवासिनी कामरूपिणी राक्षसी शूर्पणखा विरूपिता ॥ ४६ ॥

**व्याख्या**—तत्र=तस्मिन् दण्डकारण्ये, एव=निश्चयेन, वसता=निवासं कुर्वता, तिष्ठता, तेन=रामेण, जनस्थाननिवासिनी=दण्डकारण्यैकदेशे जनस्थाने पञ्चवट्यां निवासं कुर्वती, कामरूपिणी=स्वेच्छयाऽनेकरूपधारिणी, राक्षसी=निशाचरी, शूर्पणखा=शूर्पणखानाम्नी रावणभगिनी, विरूपिता=नासिकोच्छेदेन कुरूपा कृता ॥ ४६ ॥

**समासादिः**—जनस्थाने रावणसैन्यनिवासस्थले, निवसतुं शीलं यस्याः सा जनस्थाननिवासिनी । कामं रूपम् अस्या अस्तीति कामरूपिणी । शूर्पवद् नखाः यस्याः सा शूर्पणखा ॥ ४६ ॥

**भावार्थः**—दण्डकारण्य एव निवसन् श्रीरामः दण्डकारण्यैकदेशे जनस्थाननामके स्थाने निवासं कुर्वतीं स्वेच्छया नानाविधरूपधारिणीं रावणभगिनीं शूर्पणखानाम्नीं राक्षसीं लक्ष्मणद्वारा नासिकोच्छेदेन विरूपां कृतवानिति भावः ॥



**भावार्थ**—उसी दण्डकारण्य में रहते हुए राम ने ( राम की आज्ञा से लक्ष्मण ने) जनस्थान ( पञ्चवटी ) में रहनेवाली स्वेच्छा से अनेक रूप धारण करनेवाली रावण की बहन शूर्पणखा नाम की राक्षसी को नाक काट कर विरूप कर दिया ॥ ४६ ॥

**ततः शूर्पणखावाक्यादुद्युक्तान् सर्वराक्षसान् ।**
**खरं त्रिशिरसं चैव दूषणं चैव राक्षसम् ॥ ४७ ॥**
**निजघान रणे रामस्तेषां चैव पदानुगान् ।**

**अन्वयः**—ततः रामः शूर्पणखावाक्याद् उद्युक्तान् सर्वराक्षसान् खरं त्रिशिरसं चैव दूषणं राक्षसम् तेषां पदानुगान् च रणे निजघान ॥ ४७ ॥

**व्याख्या**—ततः=शूर्पणखानासिकाकर्तनानन्तरम्, रामः=दाशरथिः, शूर्पणखावाक्यात्=शूर्पणखाधिक्कारवचनात्, उद्युक्तान्=कृतोद्यमान्, सर्वराक्षसान्=सकलनिशाचरान् ( तथा तेषु प्रधानं ) खरं, त्रिशिरसं दूषणं च, राक्षसं=निशाचरं, च=अपि, एव=निश्चयेन, तथा तेषां=खरादीनां, पदानुगान्=अनुचरान्, राक्षसान्=चतुर्दशसहस्रसंख्याकान्, चैव रणे=युद्धे, निजघान=हतवान् ॥४७॥

**समासादिः**—पदानि अनुगच्छन्तीति पदानुगाः, तान् पदानुगान् । शूर्पणखाया वाक्यं शूर्पणखावाक्यं, तस्मात् शूर्पणखावाक्यात् । सर्वे च ते राक्षसाः सर्वराक्षसाः, तान् सर्वराक्षसान् ॥ ४७ ॥

**भावार्थः**—शूर्पणखानासिकोच्छेदानन्तरं रामः शूर्पणखाधिक्कारवचनैः उत्तेजितान् सर्वान् राक्षसान् तथा तेषु प्रधानान् खरदूषणत्रिशिरसः तथा तेषामनुयायिनः युद्धे निहतवानिति भावः ॥ ४७ ॥

**भावार्थ**—शूर्पणखा की नाक काट देने के बाद राम ने शूर्पणखा के धिक्कार वचनों से उत्तेजित युद्ध के लिए तैयार राक्षसों में प्रधान खर, दूषण, त्रिशिरा और उनके अनुयायी १४ हज़ार राक्षसों को युद्ध में मारा ॥४७॥

**वने तस्मिन् निवसता जनस्थाननिवासिनाम् ॥ ४८ ॥**
**रक्षसां निहतान्यासन् सहस्राणि चतुर्दश ।**

**अन्वयः**—तस्मिन् वने निवसता जनस्थाननिवासिनां रक्षसां चतुर्दशसहस्राणि निहतानि आसन् ॥ ४८ ॥

**व्याख्या**—तस्मिन वने=दण्डकारण्ये, निवसता=वासं कुर्वता, रामेण,

जनस्थाननिवासिनां=जनस्थाने कृतवसतीनां, रक्षसां=राक्षसानां, चतुर्दश-सहस्राणि=चतुर्दशसहस्रसंख्यकानि सैन्यानि, निहतानि=विनाशितानि, आसन्=अभवन् ॥ ४८ ॥

**भावार्थः**—जनस्थाने निवसता रामेण जनस्थाननिवासीनि चतुर्दशसहस्र-रक्षांसि हतानीति भावः ॥ ४८ ॥

**भाषार्थ**—जनस्थान में रहते हुए राम ने जनस्थान में ( रावण के सेना-निवेश स्थान में ) रहनेवाले चौदह हजार राक्षसों को मार डाला ॥ ४८ ॥

**ततो ज्ञातिवधं श्रुत्वा रावणः क्रोधमूर्च्छितः ॥ ४९ ॥**
**सहायं वरयामास मारीचं नाम राक्षसम् ।**

**अन्वयः**—ततः ( शूर्पणखामुखात् ) ज्ञातिवधं श्रुत्वा क्रोधमूर्च्छितः रावणः मारीचं नाम राक्षसं सहायं वरयामास ॥ ४९ ॥

**व्याख्या**—ततः=तदनन्तरम्, (शूर्पणखामुखादेव), ज्ञातिवधं=खरादिबन्धु-विनाशं, श्रुत्वा=आकर्ण्य, क्रोधमूर्च्छितः=कोपघूर्णितः, रावणः=लङ्काधिपतिः, मारीचं=मारीचनामकं राक्षसं, सहायं=सीताहरणे सहायकं, वरयामास=ययाचे ॥ ४९ ॥

**समासादिः**—ज्ञातीनां वध ज्ञातिवधः, तं ज्ञातिवधम् । रावयति लोकमिति रावणः । क्रोधेन मूर्च्छितः क्रोधमूर्च्छितः ॥ ४९ ॥

**भावार्थः**—तदनन्तरं शूर्पणखामुखात् खरदूषणत्रिशिरःप्रभृतीनां बन्धूनां विनाशं निशम्य क्रोधमूर्च्छितो रावणः सीताहरणे मारीचनामकं राक्षसं सहा-यतां कर्तुं प्रार्थयामासेति भावः ॥ ४९ ॥

**भाषार्थ**—उसके बाद शूर्पणखा के मुख से खर, दूषण, त्रिशिरा प्रभृति बन्धुओं का विनाश सुनकर क्रोध से व्याकुल होकर रावण ने अपने मामा मारीच नामक राक्षस से सीताहरण करने के लिए सहायता माँगी ॥ ४९ ॥

**वार्यमाणः सुबहुशो मारीचेन स रावणः ॥ ५० ॥**
**न विरोधो बलवता क्षमो रावण ! तेन ते ।**
**अनादृत्य तु तद्वाक्यं रावणः कालचोदितः ॥ ५१ ॥**
**जगाम सहमारीचस्तस्याश्रमपदं तदा ।**

**अन्वयः**—'हे रावण ! बलवता तेन ते विरोधः न क्षमः' ( एवं ) सुबहुशः मारीचेन सः रावणः वार्यमाणः ( अभूत् ), तु तदा रावणः कालचोदितः (सन्) तद्वाक्यम् अनादृत्य सहमारीचः तस्य आश्रमपदं जगाम ॥ ५०-५१ ॥

**व्याख्या**—हे रावण !=हे लङ्काधिपते ! बलवता=अपूर्वबलशालिना, तेन=रामेण, ते=तव, विरोधः=कलहः, न क्षमः=कथमपि न युक्त इति, सुबहुशः=अनेकशः ( भूयो भूयः ), मारीचेन=मारीचनाम्ना राक्षसेन, स रावणः वार्यमाणः=निषिध्यमानः अभूत्, तु=किन्तु, तदा=तस्मिन् काले, काल-चोदितः=मृत्युप्रेरितः सन्, तद्वाक्यं=मारीचवचनम्, अनादृत्य=अस्वीकृत्य, सहमारीचः=मारीचेन सहितः, तस्य=रामस्य, आश्रमपदं=संस्थानं, पञ्चवटी-स्थानान्तिकं, जगाम=गतवान् ॥ ५०-५१ ॥



**समासादिः**—कालेन चोदितः कालचोदितः । मारीचेन सह सहमारीचः । आश्रमस्य पदम् आश्रमपदम् । तस्य वाक्यं तद्वाक्यम् । न आदृत्य अना-दृत्य ॥ ५०-५१ ॥

**भावार्थः**—'हे लङ्काधिपते रावण ! बलशालिना रामेण तव कलहो नोचितः, यतोऽहं रामबाणक्षिप्तो विश्वामित्रस्याश्रमात् सागरपारं प्रापितः । अत्र भवता दुःसाहसो न कर्तव्यः' इत्येवं भूयो भूयो वार्यमाणोऽपि कालप्रेरितो रावणः तस्य वचनम् अस्वीकृत्य तेन सह रामस्य निवासस्थानं जगामेति भावः ।

**भाषार्थ**—'हे रावण ! उस बलवान् राम के साथ विरोध करना आपको ठीक नहीं है । इस प्रकार कहकर मारीच ने बार-बार रावण को समझाया' किन्तु उस समय काल से प्रेरित रावण उसके वचनों का अनादर करके उसे साथ में लेकर राम के निवासस्थान पर पहुँच गया ॥ ५०-५१ ॥

**तेन मायाविना दूरमपवाह्य नृपात्मजौ ॥ ५२ ॥**
**जहार भार्यां रामस्य गृध्रं हत्वा जटायुषम् ।**

**अन्वयः**—मायाविना तेन नृपात्मजौ दूरम् अपवाह्य रामस्य भार्यां जहार, ( ततः सीतां हृत्वा पलायमानमात्मानं विरोधयन्तम् ) जटायुषं गृध्रं हत्वा ( लङ्कां प्रापयामासेति शेषः ) ॥ ५२ ॥

**व्याख्या**—मायाविना=बहुविधकपटपटुना, तेन=मारीचेन, सुवर्णमय-मृगरूपधारिणा सता, नृपात्मजौ=दशरथतनयौ रामलक्ष्मणौ, दूरं=दीर्घ-मध्वानम् मृगयाच्छलेन, अपवाह्य=अपसार्य, रामस्य=दाशरथेः, भार्यां=पत्नीं ( सीतां ), जहार=हृतवान् । तदनन्तरं सीताविमोचनोपस्थितं जटायुषं=जटायुर्नामानं सम्पातिभ्रातरं दशरथसखायं गृध्रं, हत्वा=व्यापाद्य ( लङ्काभि-मुखं प्रस्थित इति शेषः ) ॥ ५२ ॥

**समासादिः**—माया अस्ति अस्येति मायावी, तेन मायाविना । नृपस्य आत्मजौ नृपात्मजौ ॥ ५२ ॥

**भावार्थः**—कपटसुवर्णमयमृगरूपधारिणा तेन मारीचेन रामलक्ष्मणौ दूरं नीत्वा रावणः सीतां जहार। ततस्तां मोक्तुमुपस्थितं जटायुषं सम्पातिभ्रातरं गृध्रं व्यापाद्य लङ्काभिमुखं प्रस्थितवानिति भावः ॥ ५२ ॥

**भाषार्थ**—( शूर्पणखा की दुर्दशा देख रावण क्रुद्ध होकर राम के निवास-स्थान पर आया और ) मायावी मारीच के द्वारा राम और लक्ष्मण को दूर हटाने के बाद उसने राम की भार्या सीता का हरण कर लिया। अनन्तर सीता को छुड़ाने के लिए उपस्थित जटायु नामक गिद्ध को मारकर लङ्का की तरफ चल दिया ॥ ५२ ॥

**गृध्रं च निहितं दृष्ट्वा हृतां श्रुत्वा च मैथिलीम् ॥ ५३ ॥**
**राघवः शोकसन्तप्तो विललापाकुलेन्द्रियः।**

**अन्वयः**—राघवः गृध्रं च निहतं दृष्ट्वा मैथिलीं च हृतां श्रुत्वा शोक-सन्तप्तः आकुलेन्द्रियः ( सन् ) विललाप ॥ ५३ ॥

**व्याख्या**—राघवः=रामः, गृध्रं=जटायुषं, निहतं=व्यापादितं, मृतमिव निश्चेष्टं दृष्ट्वा, (तन्मुखादेव ) मैथिलीं=जानकीं, हृतां=चोरितां च, श्रुत्वा= निशम्य, शोकसन्तप्तः=दुःखदग्धः, ( अत एव ) आकुलेन्द्रियः=विकलकरणः सन्, विललाप=परिदेवनमकरोत् ॥ ५३ ॥

**समासादिः**—शोकेन सन्तप्तः शोकसन्तप्तः। आकुलानि इन्द्रियाणि यस्यासौ आकुलेन्द्रियः ॥ ५३ ॥

**भावार्थः**—रामो मारीचं निहत्य स्वाश्रमं निवृत्त्य पञ्चवट्यां सीतामदृष्ट्वा शङ्कया व्याकुलहृदयः यावदितस्ततः सीतामन्विष्यति तावत् जटायुषं गृध्रं निश्चेष्टं मृतमिवावलोक्य तन्मुखादेव रावणेन हृतां सीतां श्रुत्वा शोकेन विललाप ॥ ५३ ॥

**भाषार्थ**—राम ने ( उस मायामृग मारीच को मारकर लौटने पर आश्रम में सीता को न देखकर शङ्कित हो इधर-उधर ढूंढ़ते हुए ) मरे हुए के समान निश्चेष्ट जटायु को देखा और उसके मुख से रावण द्वारा सीता का हरण सुनकर शोक से व्याकुल होकर विलाप करने लगे ॥ ५३ ॥

**ततस्तेनैव शोकेन गृध्रं दग्ध्वा जटायुषम् ॥ ५४ ॥**
**मार्गमाणो वने सीतां राक्षसं स ददर्श ह।**
**कबन्धं नाम रूपेण विकृतं घोरदर्शनम् ॥ ५५ ॥**

**अन्वयः**—ततः तेन एव शोकेन जटायुषं गृध्रं दग्ध्वा, वने सीतां मार्गमाणः सः रूपेण विकृतं घोरदर्शनं कबन्धं नाम राक्षसं ददर्श ह ॥ ५४–५५ ॥

**व्याख्या**—ततः=जटायुषो मुखात् सीताहरणवृत्तान्तश्रवणानन्तरं, तेनैव=



सीताहरणजन्येन, शोकेन=शुचा युक्तः, जटायुषं गृध्रं=जटायुनामकं गृध्रराजं, दग्ध्वा=भस्मीकृत्य, दाहसंस्कारं कृत्वा, वने=दण्डकारण्ये, सीतां=मैथिलीं, मार्गमाणः=अन्विष्यन्, सः=रामः, रूपेण=आकारेण, विकृतं=विकारयुक्तं, घोरदर्शनं=भीषणाकृतिम्, कबन्धं नाम=नाम्ना कबन्धं इति प्रसिद्धं, राक्षसं= निशाचरं, ददर्श=दृष्टवान ॥ ५४-५५ ॥

**समासादिः**—घोरं दर्शनं यस्य स घोरदर्शनः, तं घोरदर्शनम् ॥ ५४-५५ ॥

**भावार्थः**—जटायुषो मुखात् रावणेन हृतां सीतां श्रुत्वा अतिशोकसन्तप्तो रामो जटायुष और्ध्वदैहिकक्रियां कृत्वा दण्डकारण्ये सीताम् अन्विष्यन् नाम्ना रूपेण च कबन्धं भयङ्करस्वरूपं राक्षसं दृष्टवानिति भावः ॥ ५४-५५ ॥

**भाषार्थ**—जटायु के मुख से सीताहरण का समाचार सुनकर अत्यन्त व्याकुल-हृदय राम ने जटायु का दाह-संस्कार करके दण्डकारण्य में सीता को ढूंढ़ते हुए विकृत शरीरवाले भयंकर कबन्ध नामक राक्षस को देखा ॥५४-५५॥

**तं निहत्य महाबाहुर्ददाह स्वर्गतश्च सः।**
**स चास्य कथयामास शबरीं धर्मचारिणीम् ॥ ५६ ॥**
**श्रमणां धर्मनिपुणामभिगच्छेति राघव।**

**अन्वयः**—महाबाहुः तं निहत्य ददाह, स च 'हे राघव ! धर्मनिपुणां श्रमणां धर्मचारिणीं शबरीम् अभिगच्छ' इति अस्य कथयामास ॥ ५६ ॥

**व्याख्या**—महाबाहुः=आजानुदीर्घभुजो रामः, तं=कबन्धं राक्षसं, निहत्य= व्यापाद्य, ददाह=दग्धवान्, सः=कबन्धः, च=अपि, स्वः=स्वर्गं, गतः= गन्तुमारब्धवान्। परन्तु गमनसमये स दिव्यगन्धर्वदेहधारी सन् हे राघव != रघुकुलोत्पन्न राम ! धर्मनिपुणां=धर्मतत्त्वज्ञां, श्रमणां=परिव्राजकाम्, धर्म-चारिणीं=तपस्विनीं, शबरीं=शबरजातीयाम्, अभिगच्छ=उपसीद, तत्समीपं, याहीति=इदं वचनम्, अस्य=रामस्य सम्बन्धे, कथयामास=उवाच ॥ ५६ ॥

**समासादिः**—महान्तौ बाहू यस्य स महाबाहुः। धर्मं चरितं शीलमस्या इति धर्मचारिणी, तां धर्मचारिणीम्। धर्मे निपुणा धर्मनिपुणा, तां धर्मनिपुणाम्।

**भावार्थः**=आजानुबाहुः रामः कबन्धं निहत्य ततः प्राप्तदिव्यदेहस्य तस्य प्रार्थनया, तस्य मृतदेहम् अग्निना संस्कृतवान्। स च दिव्यगन्धर्वदेहधारी स्वर्गं गन्तुमुद्यतः राममुक्तवान्—'हे राम ! श्रमणधर्ममनुतिष्ठन्त्या धर्माचरणरतायाः तपस्विन्याः शबर्याः समीपं गच्छे'ति भावः ॥ ५६ ॥

**भाषार्थ**—तब आजानुबाहु राम ने उस कबन्ध को मारकर उसके शरीर

को भी जला दिया । बाद में दिव्य गन्धर्व शरीर धारणकर स्वर्ग जाते समय उसने राम से कहा कि—हे रघुकुलोत्पन्न राम ! धर्मज्ञ संन्यासिनी तपश्चरण में रत शबरी के पास आप जाइए ॥ ५६ ॥

**सोऽभ्यगच्छन्महातेजाः शबरीं शत्रुसूदनः ॥ ५७ ॥**
**शबर्या पूजितः सम्यग् रामो दशरथात्मजः ।**
**पम्पातीरे हनुमता सङ्गतो वानरेण ह ॥ ५८ ॥**

**अन्वयः**—महातेजाः शत्रुसूदनः स शबरीम् अभ्यगच्छन् ततः शबर्या सम्यक् पूजितः दशरथात्मजः रामः पम्पातीरे वानरेण हनूमता सङ्गतः (आसीद्) ह ॥

**व्याख्या**—महातेजाः=अतितेजस्वी, शत्रुसूदनः=सपत्नसंहारकः, सः=रामः, शबरीं=शबरजातिसमुद्भवां निजभक्तिमतीम्, अभ्यगच्छत्=उपससाद । ततः शबर्या सम्यक्=यथावत्, पूजितः=सत्कृतः, दशरथात्मजः=दशरथतनयः, रामः =रामचन्द्रः, पम्पातीरे=पम्पानामकसरःसमीपे, वानरेण=कपिना, हनुमता= अञ्जनीपुत्रेण, सङ्गतः=मिलितः आसीदिति शेषः । ह इति प्रसिद्धौ ॥५७-५८॥

**समासादिः**—महत्तेजो यस्य स महातेजाः । शत्रून् सूदयतीति शत्रुसूदनः । दशरथस्य आत्मजः दशरथात्मजः । पम्पायाः तीरं पम्पातीरं, तस्मिन् पम्पातीरे ।

**भावार्थः**—महातेजस्वी शत्रुसंहारको रामः आत्मनो भक्तिमतीं तपस्विनीं शबरीम् उपजगाम । सा च तं यथाविधि अत्यादरेण सत्कृतवती । ततो रामः पम्पासरः समीपे कपिकेशरीतनयेन हनुमता सह मिलित इति भावः ॥५७-५८॥

**भाषार्थ**—दिव्यदेहधारी कबन्ध के कथनानुसार अतितेजस्वी शत्रुसंहारक श्रीराम शबरी के आश्रम पर जाकर उससे यथावत् सत्कृत हुए । बाद में आगे बढ़ने पर पम्पासर के पास अञ्जनिपुत्र हनुमान् से भेंट हो गयी ॥५७-५८॥

**( इति आरण्यकाण्ड-कथासारः )**

**हनुमद्वचनाच्चैव सुग्रीवेण समागतः ।**
**सुग्रीवाय च तत्सर्वं शंसद्रामो महाबलः ॥ ५९ ॥**
**आदितस्तद्यथावृत्तं सीतायाश्च विशेषतः ।**

**अन्वयः**—हनुमद्वचनात् च एव सुग्रीवेण समागतः महाबलः रामः सुग्रीवाय आदितः तत् ( स्वकीयं ) सर्वं सीतायाश्च विशेषतः यथावृत्तं शंसत् ॥ ५९ ॥

**व्याख्या**—हनुमद्वचनात्=हनुमतः कथनात्, आग्रहानुनयनिवेदनाद्, च= अपि, एव=निश्चयेन, सुग्रीवेण=बालिकनिष्ठभ्रात्रा, समागतः=मिलितः, महाबलः=अतिबलशाली रामः, सुग्रीवाय, आदितः=प्रथमः, तत्सर्वं= सम्पूर्णं स्ववृत्तान्तं, सीतायाः=जानक्याश्च अपि, तत्=हरणादिकं सर्वं, वृत्तं= वृत्तान्तं, विशेषतः=विस्तरतः, यथा=यथावद्, शंसत्=अकथयत् । शंसदित्य-त्राडागमाभाव आर्षः ॥ ५९ ॥



**समासादिः**—इन्द्रवज्रप्रहारेण विकृतः हनुः अस्ति अस्येति हनुमान्, तस्य वचनं हनुमद्वचनं, तस्मात् हनुमद्वचनात् । सुन्दरी ग्रीवा यस्य सः सुग्रीवः, तेन सुग्रीवेण । महत् बलं यस्य स महाबलः ॥ ५९ ॥

**भावार्थः**—कपिराजस्य हनुमतः अनुनयपूर्वकनिवेदनात् सुग्रीवेण सह मिलितो राम आदितः स्वकीयं विशेषतः सीतायाश्च सर्वं समाचारं विस्तरतः श्रावयामासेति भावः ॥ ५९ ॥

**भाषार्थ**—हनुमान्जी के कहने पर सुग्रीव से मित्रता कर बलशाली राम ने सुग्रीव को शुरू से अपना और विशेष रूप से सीता का सारा वृत्तान्त कह सुनाया ॥ ५९ ॥

**सुग्रीवश्चापि तत्सर्वं श्रुत्वा रामस्य वानरः ॥ ६० ॥**
**चकार सख्यं रामेण प्रीतश्चैवाग्निसाक्षिकम् ।**

**अन्वयः**—वानरः सुग्रीवः च अपि रामस्य तत् सर्वं श्रुत्वा प्रीतश्च रामेण ( सह ) एव अग्निसाक्षिकं सख्यं चकार ॥ ६० ॥

**व्याख्या**—च इति समुच्चये, वानरः=वानरजातीयः, सुग्रीवः=बालिनोऽनुजः, अपि=निश्चयेन, रामस्य=दाशरथेः, तत् सर्वं=निखिलं वृत्तान्तं, श्रुत्वा=आकर्ण्य, प्रीतः=परमः प्रसन्नः, ( जातः, ततः ) रामेण=रामचन्द्रेण, सह=साकम् एव=निश्चयेन, अग्निसाक्षिकं=वह्निमध्यस्थताकं, सख्यं= मित्रत्वं, चकार=कृतवान् ॥ ६० ॥

**समासादिः**—अग्निः साक्षी यस्मिन् तत् अग्निसाक्षिकम् ॥ ६० ॥

**भावार्थः**—वानरजातिसमुद्भवः बालिनोऽनुजो महाबली सुग्रीवोऽपि रामस्य सकलं वृत्तान्तं निशम्य रामेण सह अग्निसाक्षिणं कृत्वा मित्रत्वं कृतवानिति भावः ॥ ६० ॥

**भाषार्थ**—वानर जाति में उत्पन्न सुग्रीव ने श्रीराम का सारा वृत्तान्त सुनकर बड़ी प्रसन्नता से राम के साथ अग्नि को साक्षी रख कर मित्रता कर ली ॥ ६० ॥

**रामायावेदितं सर्वं प्रणयाद् दुःखितेन च ।**
**ततो वानरराजेन वैरानुकथनं प्रति ॥ ६१ ॥**

**अन्वयः**—ततः दुःखितेन वानरराजेन वैरानुकथनं प्रति प्रणयात् सर्वं रामाय आवेदितम् ॥ ६१ ॥

व्याख्या—ततः=तयोः मिथो मित्रत्वयोजनानन्तरम्, दुःखितेन=सञ्जातदुःखेन, वानरराजेन=कपिपतिना सुग्रीवेण, वैरानुकथनं प्रति=बालिना सह शत्रुतावर्णनमुद्दिश्य, सर्वं=सकलं, प्रणयात्=सौहार्दात् विश्वासाद्वा, च=एव, रामाय=रामचन्द्राय, आवेदितम्=निवेदितम् ॥ ६१ ॥

समासादिः—वानराणां राजा वानरराजः, तेन वानरराजेन । वैरस्यानुकथनं वैरानुकथनम् ॥ ६१ ॥

भावार्थः—परस्परं मिथो मैत्रीयोजनानन्तरं वानरराजेन सुग्रीवेण रामं प्रति बालिना सह वैरानुकथनपूर्वकं सर्वं स्वकीयं वृत्तान्तं कथितमिति भावः ॥ ६१ ॥

भाषार्थ—अनन्तर राम और सुग्रीव में मित्रता हो जाने पर दुःखी वानरराज सुग्रीव ने राम पर विश्वास करके अपनी सारी दुःख की करुण कहानी उनसे कह सुनाई ॥ ६१ ॥

**प्रतिज्ञातं च रामेण तथा बालिवधं प्रति ॥ ६२ ॥**
**बालिनश्च बलं तत्र कथयामास वानरः ।**
**सुग्रीवः शङ्कितश्चासीन्नित्यं वीर्येण राघवे ॥ ६३ ॥**

अन्वयः—तदा रामेण च बालिवधं प्रति प्रतिज्ञातम्, (किन्तु) सुग्रीवः नित्यं राघवे वीर्येण शङ्कितः च आसीत्, तत्र वानरः बालिनः बलं च कथयामास ।

व्याख्या—तदा=सुग्रीवदुःखश्रवणानन्तरं, रामेण=रामचन्द्रेण च, बालिवधं प्रति=बालिनो विनाशमुद्दिश्य, प्रतिज्ञातम्=प्रतिज्ञा कृता, (किन्तु) सुग्रीवः=बालिभ्राता, नित्यम्=सर्वदा, राघवे=रामे, वीर्येण=बलेन, विक्रमेण, शङ्कितः=सन्दिग्धः, च=एव, आसीत्=अभूत्, तत्र=तत्प्रतिज्ञाविषये, किष्किन्धायां वा, वानरः=कपिः सुग्रीवः, बालिनः=स्वभ्रातुः, बलं=वीर्यं च, कथयामास=उवाच ॥ ६२–६३ ॥

समासादिः—बालिनो वधः बालिवधः, तं बालिवधम् । शङ्का सञ्जाता अस्येति शङ्कितः ॥ ६२–६३ ॥

भावार्थः—सुग्रीवस्य दुःखं श्रुत्वा रामोऽपि बालिवधं प्रतिज्ञातवान्, परन्तु रामस्य बालिवधे सामर्थ्यमस्ति न वेति सन्दिहानः सुग्रीवः तदा बालिनो बलं अरुणोदयानन्तरं सूर्योदयात् प्रागेव रावणं कुक्षौ गृहीत्वा चतुःसमुद्रलङ्घनादिरूपं विशिष्टं बलं कथयामासेति भावः ॥ ६२-६३ ॥



भाषार्थ—तब सुग्रीव के दुःख को सुनकर राम ने बालि को मारने की प्रतिज्ञा की, परन्तु बालि को मारने में राम समर्थ हैं या नहीं ? इस सन्देह में पड़कर सुग्रीव ने बालि के बल की प्रशंसा की ( जैसे एक बार बालि राक्षसराज लङ्काधिपति रावण को बगल में दबाकर चारों समुद्रों को लाँघ आया था) ।

**राघवप्रत्ययार्थं तु दुन्दुभेः कायमुत्तमम् ।**
**दर्शयामास सुग्रीवो महापर्वतसन्निभम् ॥ ६४ ॥**

अन्वयः—सुग्रीवः राघवप्रत्ययार्थं तु महापर्वतसन्निभम् उत्तमं दुन्दुभेः कायं दर्शयामास ॥ ६४ ॥

व्याख्या—सुग्रीवः=वानरराजः, राघवप्रत्ययार्थं=रामविश्वासार्थं, बालिनो महाबलशालित्वे रामस्य विश्वासोत्पादनार्थं, महापर्वतसन्निभं=बृहद्गिरिसदृशं, दुन्दुभेः=दुन्दुभिनाम्नो राक्षसस्य, कायं=कलेवरं ( देहकङ्कालं वा ), दर्शयामास=अदर्शयत् ॥ ६४ ॥

समासादिः—राघवस्य प्रत्ययः राघवप्रत्ययः, तस्मै राघवप्रत्ययाय इदं राघवप्रत्ययार्थम् । महांश्चासौ पर्वतः महापर्वतः, महापर्वतेन सन्निभः महापर्वतसन्निभः, तं महापर्वतसन्निभम् ॥ ६४ ॥

भावार्थः—सुग्रीवः बालिः कीदृशो बलशाली वर्तते इति रामविश्वासार्थं दुन्दुभेः राक्षसस्य विशालपर्वताकारमस्थिमात्रावशिष्टं निहतशरीरं दर्शयामासेति भावः ॥ ६४ ॥

भाषार्थ—सुग्रीव ने बालि के बल का राम को विश्वास दिलाने के लिए महान् पर्वत के समान ऊँचा, बालि के बल के प्रतीक मरे हुए दुन्दुभि राक्षस के देह-कंकाल को दिखाया ॥ ६४ ॥

**उत्स्मयित्वा महाबाहुः प्रेक्ष्य चास्थि महाबलः ।**
**पादाङ्गुष्ठेन चिक्षेप सम्पूर्णं दशयोजनम् ॥ ६५ ॥**

अन्वयः—महाबाहुः महाबलः च सम्पूर्णं अस्थि प्रेक्ष्य उत्स्मयित्वा पादाङ्गुष्ठेन, दशयोजनं चिक्षेप ॥ ६५ ॥

व्याख्या—महाबाहुः=विशालभुजः, महाबलः=अतिबलशाली रामः, अस्थि=दुन्दुभिकङ्कालं, प्रेक्ष्य=दृष्ट्वा, च=पुनः, उत्स्मयित्वा='आः कियन्मात्रमेतद्' इत्यनादरेणेषद्धास्यं कृत्वा, पादाङ्गुष्ठेन=चरणाङ्गुष्ठेन, सम्पूर्णम्=सकलम्, दशयोजनम्=चत्वारिंशत्क्रोशपरिमितं दूरं, चिक्षेप=निक्षिप्तवान् ।६५।

**समासादिः**—महान्तौ बाहू यस्य स महाबाहुः । महद् बलं यस्य सः महाबलः । पादस्य अङ्गुष्ठं, तेन पादाङ्गुष्ठेन ॥ ६५ ॥

**भावार्थः**—विशालबाहुः बली रामः दुन्दुभेः, देहकङ्कालं विलोक्य आः इदं कियन्मात्रमिति अनादरेणेषद्धास्यं विधाय पादाङ्गुष्ठेन सम्पूर्णं तद् दशयोजनदूरं निक्षिप्तवानिति भावः ॥ ६५ ॥

**भाषार्थ**—विशालबाहु महाबली राम ने सुग्रीव के सन्देह को समझकर उसके विश्वासार्थ थोड़ा हँसकर दुन्दुभि के उस पूरे देहकङ्काल को पैर के अंगूठे से दस योजन दूर फेंक दिया ॥ ६५ ॥

**बिभेद च पुनस्तालान् सप्तैकेन महेषुणा ।**
**गिरिं रसातलं चैव जनयन् प्रत्ययं तदा ॥ ६६ ॥**

**अन्वयः**—तदा पुनः च प्रत्ययं जनयन् एकेन महेषुणा सप्त तालान्, गिरिं रसातलं चैव बिभेद ॥ ६६ ॥

**व्याख्या**—तदा=सुग्रीवसन्देहदूरीकरणावसरे, पुनः=भूयः, प्रत्ययं=विश्वासं, जनयन्=उत्पादयन् (श्रीरामः), एकेन=एकसंख्याकेन, महेषुणा=महता बाणेन, सप्त=सप्तसंख्याकान्, तालान्=तालवृक्षान्, गिरिं=पर्वतम्, रसातलं=पातालं, च=अपि, एव=निश्चयेन, बिभेद=विदीर्णवान् ॥ ६६ ॥

**समासादिः**—महांश्चासौ इषुः महेषुः, तेन महेषुणा ॥ ६६ ॥

**भावार्थः**—ततो रामः सुग्रीवस्य बालिवधे विश्वासोत्पादनार्थम् एकेनैव बाणेन सप्तसंख्याकान् तालवृक्षान् पर्वतं पातालं च विदीर्णवानिति भावः ॥६६॥

**भाषार्थ**—उस समय सुग्रीव को बालि के वध करने योग्य अपने बल का विश्वास दिलाते हुए श्रीराम ने एक ही बाण से बड़े-बड़े सात ताल के वृक्षों को और पर्वत एवं पाताल को छेद दिया ॥ ६६ ॥

**ततः प्रीतमनास्तेन विश्वस्तः स महाकपिः ।**
**किष्किन्धां रामसहितो जगाम च गुहां तदा ॥ ६७ ॥**

**अन्वयः**—ततः सः महाकपिः तेन विश्वस्तः प्रीतिमनाः (सन्) रामसहितः तदा किष्किन्धां गुहां च जगाम ॥ ६७ ॥

**व्याख्या**—ततः=रामपराक्रमदर्शनानन्तरं, स महाकपिः=महावानरः सुग्रीवः, तेन=दुन्दुभिकङ्कालप्रक्षेपेण सप्ततालविच्छेदनकर्मणा, विश्वस्तः=विश्वासं प्राप्तः, प्रीतिमनाः=प्रसन्नचित्तः सन्, रामसहितः=रामेण सह, तदा=तस्मिन् समये, किष्किन्धाम्=किष्किन्धानाम्नीं, गुहां=गिरीकन्दरां, जगाम=गतवान् ॥६७॥



**समासादिः**—प्रीतं मनो यस्य स प्रीतमना । महांश्चासौ कपिः महाकपिः । रामेण सहितः रामसहितः । किं किं दधातीति किष्किन्धा, तां किष्किन्धाम् ॥६७॥

**भावार्थः**—तदनन्तरं दुन्दुभिकङ्कालप्रक्षेपेण सप्ततालभेदनकर्मणा च रामे जातविश्वासः महाकपिः सुग्रीवः अतिप्रसन्नः सन् रामेण सह तदा किष्किन्धा-नाम्नीं पर्वतकन्दरां गतवानिति भावः ॥ ६७ ॥

**भाषार्थ**—उसके बाद राम के उस अद्भुत पराक्रम से अत्यन्त प्रसन्न होकर वानरराज सुग्रीव राम को साथ लेकर उसी समय बालि पर आक्रमण करने के लिए किष्किन्धा गुहा की ओर चल पड़े ॥ ६७ ॥

**ततोऽगर्जद्धरिवरः सुग्रीवो हेमपिङ्गलः ।**
**तेन नादेन महता निर्जगाम हरीश्वरः ॥ ६८ ॥**

**अन्वयः**—ततः हेमपिङ्गलः हरिवरः सुग्रीव अगर्जत्, तेन महता नादेन हरीश्वरः ( च ) निर्जगाम ॥ ६८ ॥

**व्याख्या**—ततः=किष्किन्धागुहागमनानन्तरं, हेमपिङ्गलः=सुवर्णवर्णः, हरि-वरः=वानरश्रेष्ठः, सुग्रीवः=वानरराजः, अगर्जत्=सिंहनादमकरोत् । तेन=सुग्रीव-कृतेन, महता=पूर्वापेक्षयाधिकेन, नादेन=शब्देन, हरीश्वरः=वानराधिपतिः बालिः, अपि निर्जगाम=गुहातो बहिर्निर्गतः ॥ ६८ ॥

**समासादि**—हरिषु वरः हरिवरः । हेम इव पिङ्गलः हेमपिङ्गलः । हरीणामीश्वरः हरीश्वरः ॥ ६८ ॥

**भावार्थः**—किष्किन्धागमनानन्तरं सुवर्णवर्णः सुग्रीवः गमनमकरोत्, महा-बली बालिः अपि तद् आक्रमणसूचकं गर्जनं श्रुत्वा गुहातो बहिर्निर्गतः ॥६८॥

**भाषार्थ**—किष्किन्धा पहुँचने पर सोने के समान पीत वर्णवाले वानरश्रेष्ठ सुग्रीव ने बड़े जोर से गर्जना की । महाबली बालि उस गर्जना को सुनकर अपनी कन्दरा से बाहर आ गया ॥ ६८ ॥

**अनुमान्य तदा तारां सुग्रीवेण समागतः ।**
**निजघान च तत्रैनं शरेणैकेन राघवः ॥ ६९ ॥**

**अन्वयः**—तदा ताराम् अनुमान्य सुग्रीवेण समागतः । राघवः च तत्र एनम् एकेन शरेण निजघान ॥ ६९ ॥

**व्याख्या**—तदा=तस्मिन् काले, तारा=तारानाम्नीं निजपत्नीम्, अनुमान्य=सन्तोष्य, सुग्रीवेण=स्वकनिष्ठभ्रात्रा सह, योद्धुं समागतः=उपस्थितः, राघवः=रामः, च तत्र=किष्किन्धायाम्, एनं=बालिनं, एकेन शरेण=एकबाणेन, निजघान=निहतवान् ॥ ६९ ॥

**समासादिः**—रघोरपत्यं पुमानिति राघवः, रघुकुले जातो वा राघवः

**भावार्थः**—सुग्रीवस्य रामेण सह मैत्री जाता। अतोऽयं तत्सहायो जेतुं शक्यः। तस्मात् त्वया न गन्तव्यमित्येवं निवारयन्त्या अपि स्वपत्न्याः ताराय अनुमतिं गृहीत्वा बालिः सुग्रीवेण सह योद्धुं प्रवृत्तः। तत्र किष्किन्धाकन्दराय जायमाने परस्परं तयोः युद्धे सुग्रीवं दुर्बलमनुभूय श्रीरामः एकेनैव बाणेन बालिनं आततायिनं निहतवानिति भावः॥ ६९॥

**भाषार्थ**—सुग्रीव की गर्जना से क्रुद्ध होकर बालि अपनी स्त्री तारा को किसी प्रकार समझा-बुझा कर सुग्रीव से आकर भिड़ गया। बाद में राम ने सुग्रीव को कमजोर जानकर एक ही बाण से उस आततायी बाली को मा गिराया॥ ६९॥

**ततः सुग्रीववचनाद्धत्वा बालिनमाहवे।**
**सुग्रीवमेव तद्राज्ये राघवः प्रत्यपादयत्॥ ७०॥**

**अन्वयः**—ततः राघवः सुग्रीववचनात् आहवे बालिनं हत्वा, तद्राज्ये सुग्रीवम् एव प्रत्यपादयत्॥ ७०॥

**व्याख्या**—ततः=तदनन्तरं, राघवः=रामः, सुग्रीववचनात्=सुग्रीवकरुण वचनात्, आहवे=युद्धे, बालिनं=सुग्रीवभ्रातरं, हत्वा=व्यापाद्य, तद्राज्ये= बालिराज्ये, सुग्रीवं=बालिकनिष्ठभ्रातरम्, एव=निश्चयेन, प्रत्यपादयद्= स्थापयामास॥ ७०॥

**समासादिः**—सुग्रीवस्य वचनं सुग्रीववचनं, तस्मात् सुग्रीववचनात्॥७०॥

**भावार्थः**—ततो राघवः सुग्रीवप्रार्थनया युद्धे बालिनं हत्वा सुग्रीवायैव तदीय राज्यं प्रददाविति भावः॥ ७०॥

**भाषार्थ**—उसके बाद सुग्रीव के कहने से राम ने युद्ध में एक बाण से बालि को मारकर उसकी राजगद्दी पर सुग्रीव को ही बैठा दिया॥ ७०॥

**स च सर्वान् समानीय वानरान् वानरर्षभः।**
**दिशः प्रस्थापयामास दिदृक्षुर्जनकात्मजाम्॥ ७१॥**

**अन्वयः**—स वानरर्षभः च सर्वान् वानरान् समानीय जनकात्मजां दिदृक्षुः दिशः प्रस्थापयामास॥ ७१॥

**व्याख्या**—वानरर्षभः=कपिश्रेष्ठः, सः=सुग्रीवः, च=अपि, सर्वान्=राज्य वर्तिनः सकलान्, वानरान्=कपीन्, समानीय=आहूय, जनकात्मजां=जनक तनयां जानकीं, दिदृक्षुः=द्रष्टुमिच्छुः, दिशः=सर्वाः ककुभः प्रति, प्रस्थापया मास=प्रेषितवान्॥ ७१॥



**समासादिः**—वानरेषु ऋषभः वानरर्षभः। आत्मना जाता आत्मजा, जनकस्य आत्मजा जनकात्मजा, तां जनकात्मजाम्। द्रष्टुमिच्छुर्दिदृक्षुः॥ ७१॥

**भावार्थः**—ततः रामद्वारा बालिवधानन्तरं किष्किन्धाराज्यमवाप्य वानरश्रेष्ठो राजा सुग्रीवः निजराज्यवर्तिनः सकलान् वानरान् आहूय सीतान्वेषणार्थं सर्वासु दिक्षु प्रेषितवानिति भावः॥ ७१॥

**भाषार्थ**—बाद में वानरों के राजा सुग्रीव ने राज्यमध्यवर्ती वानरों को बुलाकर सीताजी की खोज के लिए सब दिशाओं में भेजा॥ ७१॥

**( इति किष्किन्धाकाण्ड-कथासारः )**

**ततो गृध्रस्य वचनात् सम्पातेर्हनुमान् बली।**
**शतयोजनविस्तीर्णं पुप्लुवे लवणार्णवम्॥ ७२॥**

**अन्वयः**—ततः बली हनुमान् सम्पातेः गृध्रस्य वचनात् शतयोजनविस्तीर्णं लवणार्णवं पुप्लुवे॥ ७२॥

**व्याख्या**—ततः=तदनन्तरं, वानराणां प्रस्थानानन्तरं, बली=अतिबलशाली, हनुमान्=पवनपुत्रः, गृध्रस्य सम्पातेः=जटायुज्येष्ठभ्रातुः, वचनात्=वाक्यात्, शतयोजनविस्तीर्णं=चतुःशतक्रोशविस्तीर्णं, लवणार्णवम्=लवणसमुद्रं, पुप्लुवे=उल्लङ्घितवान्॥ ७२॥

**समासादिः**—शतं योजनानि शतयोजनानि, शतयोजनानि विस्तीर्णं शतयोजनविस्तीर्णम्। लवणस्य अर्णवः लवणार्णवः, तं लवणार्णवम्॥ ७२॥

**भावार्थः**—तदनन्तरं महाबलशाली हनुमान् जटायुषो ज्येष्ठभ्रातुर्वाक्यात् शतयोजनविस्तीर्णं समुद्रं लङ्घयामासेति भावः॥ ७२॥

**भाषार्थ**—सीताजी की खोज में किष्किन्धा से वानरों के प्रस्थान करने के बाद महाबलशाली हनुमान् गृध्रराज जटायु के ज्येष्ठ भ्राता सम्पाति के कहने से सौ योजन ( चार सौ कोश ) विस्तीर्ण क्षार समुद्र को लाँघ गये॥ ७२॥

**तत्र लङ्कां समासाद्य पुरीं रावणपालिताम्।**
**ददर्श सीतां ध्यायन्तीमशोकवनिकां गताम्॥ ७३॥**

**अन्वयः**—तत्र रावणपालितां लङ्कां पुरीं समासाद्य अशोकवनिकां गतां ध्यायन्तीं सीतां ददर्श ( हनुमानिति शेषः )॥ ७३॥

**व्याख्या**—तत्र=लवणसमुद्रस्य दक्षिणे तीरे, रावणपालितां=दशाननरक्षितां, लङ्कां=लङ्कानगरीं, समासाद्य=प्राप्य, अशोकवनिकां गताम्=

**समासादिः**—महान्तौ बाहू यस्य स महाबाहुः । महद् बलं यस्य सः महाबलः । पादस्य अङ्गुष्ठं, तेन पादाङ्गुष्ठेन ॥ ६५ ॥

**भावार्थः**—विशालबाहुः बली रामः दुन्दुभेः, देहकङ्कालं विलोक्य आः इदं कियन्मात्रमिति अनादरेणेषद्धास्यं विधाय पादाङ्गुष्ठेन सम्पूर्णं तद् दशयोजनदूरं निक्षिप्तवानिति भावः ॥ ६५ ॥

**भाषार्थ**—विशालबाहु महाबली राम ने सुग्रीव के सन्देह को समझकर उसके विश्वासार्थ थोड़ा हंसकर दुन्दुभि के उस पूरे देहकङ्काल को पैर के अंगूठे से दस योजन दूर फेंक दिया ॥ ६५ ॥

**बिभेद च पुनस्तालान् सप्तैकेन महेषुणा ।**
**गिरिं रसातलं चैव जनयन् प्रत्ययं तदा ॥ ६६ ॥**

**अन्वयः**—तदा पुनः च प्रत्ययं जनयन् एकेन महेषुणा सप्त तालान्, गिरिं रसातलं चैव बिभेद ॥ ६६ ॥

**व्याख्या**—तदा=सुग्रीवसन्देहदूरीकरणावसरे, पुनः=भूयः, प्रत्ययं=विश्वासं, जनयन्=उत्पादयन् (श्रीरामः), एकेन=एकसंख्याकेन, महेषुणा=महता बाणेन, सप्त=सप्तसंख्याकान्, तालान्=तालवृक्षान्, गिरिं=पर्वतम्, रसातलं=पातालं, च=अपि, एव=निश्चयेन, बिभेद=विदीर्णवान् ॥ ६६ ॥

**समासादिः**—महांश्चासौ इषुः महेषुः, तेन महेषुणा ॥ ६६ ॥

**भावार्थः**—ततो रामः सुग्रीवस्य बालिवधे विश्वासोत्पादनार्थम् एकेनैव बाणेन सप्तसंख्याकान् तालवृक्षान् पर्वतं पातालं च विदीर्णवानिति भावः ॥६६॥

**भाषार्थ**—उस समय सुग्रीव को बालि के वध करने योग्य अपने बल का विश्वास दिलाते हुए श्रीराम ने एक ही बाण से बड़े-बड़े सात ताल के वृक्षों को और पर्वत एवं पाताल को छेद दिया ॥ ६६ ॥

**ततः प्रीतमनास्तेन विश्वस्तः स महाकपिः ।**
**किष्किन्धां रामसहितो जगाम च गुहां तदा ॥ ६७ ॥**

**अन्वयः**—ततः सः महाकपिः तेन विश्वस्तः प्रीतिमनाः (सन्) रामसहितः तदा किष्किन्धां गुहां च जगाम ॥ ६७ ॥

**व्याख्या**–ततः=रामपराक्रमदर्शनानन्तरं, स महाकपिः=महावानरः सुग्रीवः, तेन=दुन्दुभिकङ्कालप्रक्षेपेण सप्ततालविच्छेदनकर्मणा, विश्वस्तः=विश्वासं प्राप्तः. प्रीतिमनाः=प्रसन्नचित्तः सन्, रामसहितः=रामेण सह, तदा=तस्मिन् समये, किष्किन्धाम्=किष्किन्धानाम्नीं, गुहां=गिरीकन्दरां, जगाम=गतवान् ॥६७॥



**समासादिः**—प्रीतं मनो यस्य स प्रीतमना । महांश्चासौ कपिः महाकपिः । रामेण सहितः रामसहितः । किं किं दधातीति किष्किन्धा, तां किष्किन्धाम् ॥६७॥

**भावार्थः**—तदनन्तरं दुन्दुभिकङ्कालप्रक्षेपेण सप्ततालभेदनकर्मणा च रामे जातविश्वासः महाकपिः सुग्रीवः अतिप्रसन्नः सन् रामेण सह तदा किष्किन्धा-नाम्नीं पर्वतकन्दरां गतवानिति भावः ॥ ६७ ॥

**भाषार्थ**—उसके बाद राम के उस अद्भुत पराक्रम से अत्यन्त प्रसन्न होकर वानरराज सुग्रीव राम को साथ लेकर उसी समय बालि पर आक्रमण करने के लिए किष्किन्धा गुहा की ओर चल पड़े ॥ ६७ ॥

**ततोऽगर्जद्धरिवरः सुग्रीवो हेमपिङ्गलः ।**
**तेन नादेन महता निर्जगाम हरीश्वरः ॥ ६८ ॥**

**अन्वयः**—ततः हेमपिङ्गलः हरिवरः सुग्रीव अगर्जत्, तेन महता नादेन हरीश्वरः ( च ) निर्जगाम ॥ ६८ ॥

**व्याख्या**—ततः=किष्किन्धागुहागमनानन्तरं, हेमपिङ्गलः=सुवर्णवर्णः, हरि-वरः=वानरश्रेष्ठः, सुग्रीवः=वानरराजः, अगर्जत्=सिंहनादमकरोत् । तेन=सुग्रीव-कृतेन, महता=पूर्वापेक्षयाधिकेन, नादेन=शब्देन, हरीश्वरः=वानराधिपतिः बालिः, अपि निर्जगाम=गुहातो बहिर्निर्गतः ॥ ६८ ॥

**समासादि**—हरिषु वरः हरिवरः । हेम इव पिङ्गलः हेमपिङ्गलः । हरीणामीश्वरः हरीश्वरः ॥ ६८ ॥

**भावार्थः**—किष्किन्धागमनानन्तरं सुवर्णवर्णः सुग्रीवः गमनमकरोत्, महा-बली बालिः अपि तद् आक्रमणसूचकं गर्जनं श्रुत्वा गुहातो बहिर्निर्गतः ॥६८॥

**भाषार्थ**—किष्किन्धा पहुँचने पर सोने के समान पीत वर्णवाले वानरश्रेष्ठ सुग्रीव ने बड़े जोर से गर्जना की । महाबली बालि उस गर्जना को सुनकर अपनी कन्दरा से बाहर आ गया ॥ ६८ ॥

**अनुमान्य तदा तारां सुग्रीवेण समागतः ।**
**निजघान च तत्रैनं शरेणैकेन राघवः ॥ ६९ ॥**

**अन्वयः**—तदा ताराम् अनुमान्य सुग्रीवेण समागतः । राघवः च तत्र एनम् एकेन शरेण निजघान ॥ ६९ ॥

**व्याख्या**—तदा=तस्मिन् काले, तारा=तारानाम्नीं निजपत्नीम्, अनुमान्य=सन्तोष्य, सुग्रीवेण=स्वकनिष्ठभ्रात्रा सह, योद्धुं समागतः=उपस्थितः, राघवः=रामः, च तत्र=किष्किन्धायाम्, एनं=बालिनं, एकेन शरेण=एकबाणेन, निजघान=निहतवान् ॥ ६९ ॥

**समासादि:**—रघोरपत्यं पुमानिति राघवः, रघुकुले जातो वा राघवः ।

**भावार्थः**—सुग्रीवस्य रामेण सह मैत्री जाता । अतोऽयं तत्सहायो जेतुं न शक्यः । तस्मात् त्वया न गन्तव्यमित्येवं निवारयन्त्या अपि स्वपत्न्याः ताराया अनुमतिं गृहीत्वा बालिः सुग्रीवेण सह योद्धुं प्रवृत्तः । तत्र किष्किन्धाकन्दरायां जायमाने परस्परं तयोः युद्धे सुग्रीवं दुर्बलमनुभूय श्रीरामः एकेनैव बाणेन तं बालिनं आततायिनं निहतवानिति भावः ॥ ६९ ॥

**भाषार्थ**—सुग्रीव की गर्जना से क्रुद्ध होकर बालि अपनी स्त्री तारा को किसी प्रकार समझा-बुझा कर सुग्रीव से आकर भिड़ गया । बाद में राम ने सुग्रीव को कमजोर जानकर एक ही बाण से उस आततायी बाली को मार गिराया ॥ ६९ ॥

**ततः सुग्रीववचनाद्धत्वा बालिनमाहवे ।**
**सुग्रीवमेव तद्राज्ये राघवः प्रत्यपादयत् ॥ ७० ॥**

**अन्वयः**—ततः राघवः सुग्रीववचनात् आहवे बालिनं हत्वा, तद्राज्ये सुग्रीवम् एव प्रत्यपादयत् ॥ ७० ॥

**व्याख्या**—ततः = तदनन्तरं, राघवः = रामः, सुग्रीववचनात्=सुग्रीवकरुणवचनात्, आहवे = युद्धे, बालिनं = सुग्रीवभ्रातरं, हत्वा = व्यापाद्य, तद्राज्ये = बालिराज्ये, सुग्रीवं = बालिकनिष्ठभ्रातरम्, एव = निश्चयेन, प्रत्यपादयद् = स्थापयामास ॥ ७० ॥

**समासादिः**—सुग्रीवस्य वचनं सुग्रीववचनं, तस्मात् सुग्रीववचनात् ॥७०॥

**भावार्थः**—ततो राघवः सुग्रीवप्रार्थनया युद्धे बालिनं हत्वा सुग्रीवायैव तदीय राज्यं प्रददाविति भावः ॥ ७० ॥

**भाषार्थ**—उसके बाद सुग्रीव के कहने से राम ने युद्ध में एक बाण से बालि को मारकर उसकी राजगद्दी पर सुग्रीव को ही बैठा दिया ॥ ७० ॥

**स च सर्वान् समानीय वानरान् वानरर्षभः ।**
**दिशः प्रस्थापयामास दिदृक्षुर्जनकात्मजाम् ॥ ७१ ॥**

**अन्वयः**-स वानरर्षभः च सर्वान् वानरान् समानीय जनकात्मजां दिदृक्षुः दिशः प्रस्थापयामास ॥ ७१ ॥

**व्याख्या**—वानरर्षभः = कपिश्रेष्ठः, सः = सुग्रीवः, च=अपि, सर्वान्=राज्यवर्तिनः सकलान्, वानरान् = कपीन्, समानीय = आहूय, जनकात्मजां = जनकतनयां जानकीं, दिदृक्षुः = द्रष्टुमिच्छुः, दिशः = सर्वाः ककुभः प्रति, प्रस्थापयामास = प्रेषितवान् ॥ ७१ ॥



**समासादिः**—वानरेषु ऋषभः वानरर्षभः । आत्मना जाता आत्मजा, जनकस्य आत्मजा जनकात्मजा, तां जनकात्मजाम् । द्रष्टुमिच्छुर्दिदृक्षुः ॥ ७१ ॥

**भावार्थः**—ततः रामद्वारा बालिवधानन्तरं किष्किन्धाराज्यमवाप्य वानरश्रेष्ठो राजा सुग्रीवः निजराज्यवर्तिनः सकलान् वानरान् आहूय सीतान्वेषणार्थं सर्वासु दिक्षु प्रेषितवानिति भावः ॥ ७१ ॥

**भाषार्थ**—बाद में वानरों के राजा सुग्रीव ने राज्यमध्यवर्ती वानरों को बुलाकर सीताजी की खोज के लिए सब दिशाओं में भेजा ॥ ७१ ॥

**( इति किष्किन्धाकाण्ड-कथासारः )**

**ततो गृध्रस्य वचनात् सम्पातेर्हनुमान् बली ।**
**शतयोजनविस्तीर्णं पुप्लुवे लवणार्णवम् ॥ ७२ ॥**

**अन्वयः**—ततः बली हनुमान् सम्पातेः गृध्रस्य वचनात् शतयोजनविस्तीर्णं लवणार्णवं पुप्लुवे ॥ ७२ ॥

**व्याख्या**—ततः = तदनन्तरं, वानराणां प्रस्थानानन्तरं, बली = अतिबलशाली, हनुमान् = पवनपुत्रः, गृध्रस्य सम्पातेः = जटायुज्येष्ठभ्रातुः, वचनात् = वाक्यात्, शतयोजनविस्तीर्णं = चतुःशतक्रोशविस्तीर्णं, लवणार्णवम्=लवणसमुद्रं, पुप्लुवे = उल्लङ्घितवान् ॥ ७२ ॥

**समासादिः**—शतं योजनानि शतयोजनानि, शतयोजनानि विस्तीर्णं शतयोजनविस्तीर्णम् । लवणस्य अर्णवः लवणार्णवः, तं लवणार्णवम् ॥ ७२ ॥

**भावार्थः**—तदनन्तरं महाबलशाली हनुमान् जटायुषो ज्येष्ठभ्रातुर्वाक्यात् शतयोजनविस्तीर्णं समुद्रं लङ्घयामासेति भावः ॥ ७२ ॥

**भाषार्थ**—सीताजी की खोज में किष्किन्धा से वानरों के प्रस्थान करने के बाद महाबलशाली हनुमान् गृध्रराज जटायु के ज्येष्ठ भ्राता सम्पाति के कहने से सौ योजन ( चार सौ कोश ) विस्तीर्ण क्षार समुद्र को लाँघ गये ॥ ७२ ॥

**तत्र लङ्कां समासाद्य पुरीं रावणपालिताम् ।**
**ददर्श सीतां ध्यायन्तीमशोकवनिकां गताम् ॥ ७३ ॥**

**अन्वयः**—तत्र रावणपालितां लङ्कां पुरीं समासाद्य अशोकवनिकां गतां ध्यायन्तीं सीतां ददर्श ( हनुमानिति शेषः ) ॥ ७३ ॥

**व्याख्या**—तत्र = लवणसमुद्रस्य दक्षिणे तीरे, रावणपालितां = दशाननरक्षितां, लङ्कां = लङ्कानगरीं, समासाद्य = प्राप्य, अशोकवनिकां गताम् =

अशोकवृक्षवाटिकावस्थिताम्, ध्यायन्तीं=रामचरणकमलं चिन्तयन्तीं, सीतां=जानकीं, ददर्श=अवलोकयामास ॥ ७३ ॥

**समासादिः**—रावणेन पालिता रावणपालिता, तां रावणपालिताम्। अशोकानां वनिका अशोकवनिका, ताम् अशोकवनिकाम् ॥ ७३ ॥

**भावार्थः**—क्षीरसागरस्य दक्षिणे तटे वर्तमानां रावणरक्षितां लङ्कापुरीं प्राप्य पवनात्मजो हनुमान् अशोकवाटिकायां रामस्य चरणाम्बुजं स्मरन्तीं सीतां ददर्शेति भावः ॥ ७३ ॥

**भाषार्थ**—दक्षिण समुद्र के दक्षिण तट पर वर्तमान रावण द्वारा रक्षित लङ्कापुरी में पहुँचकर हनुमान्‌जी ने ढूंढते-ढूंढते अशोकवाटिका में बैठकर राम के चरणकमल का ध्यान करती हुई सीताजी को देखा ॥ ७३ ॥

**निवेदयित्वाऽभिज्ञानं प्रवृत्तिं विनिवेद्य च।**
**समाश्वास्य च वैदेहीं मर्दयामास तोरणम् ॥ ७४ ॥**

**अन्वयः**—(हनुमान्) अभिज्ञानं निवेदयित्वा प्रवृत्तिं विनिवेद्य च, वैदेहीं समाश्वास्य च तोरणं मर्दयामास ॥ ७४ ॥

**व्याख्या**—(हनुमान् सीतायै) अभिज्ञानं=मुद्रिकारूपं परिचयचिह्नम्, निवेदयित्वा=समर्प्य, च=अपि, प्रवृत्तिं=वार्तां सुग्रीवमित्रतादिकं समाचारजातम्, विनिवेद्य=उक्त्वा, वैदेहीं=मैथिलीं, समाश्वास्य=सान्त्वयित्वा, च=पुनः, तोरणं=अशोकवाटिकाबहिर्द्वारम्, मर्दयामास=चूर्णयामास ॥ ७४ ॥

**भावार्थः**—हनुमान् सीतायै परिचायकं रामस्याङ्गुलीयकं प्रदाय सुग्रीवसख्यादिकं वृत्तं कथयित्वा शीघ्रमेव भवतीपतिं रामः सैन्यमादायागमिष्यत्यादिवाक्यैः जानकीं सान्त्वयित्वा च अशोकवाटिकाबहिर्द्वारं बुभुक्षया बभञ्ज ॥ ७४ ॥

**भाषार्थ**—हनुमान् ने सीता को राम की निशानी (अँगूठी) दिखाकर सुग्रीव से मित्रता, सेनासङ्गठन आदि का समाचार सुनाकर और अनेक प्रकार से उन्हें आश्वासन (सान्त्वना) देकर अशोकवाटिका के बाहरी दरवाजे के गुम्बज को तोड़ डाला ॥ ७४ ॥

**पञ्च सेनाग्रगान् हत्वा सप्त मन्त्रिसुतानपि।**
**शूरमक्षं च निष्पिष्य ग्रहणं समुपागमत् ॥ ७५ ॥**

**अन्वयः**—पञ्च सेनाग्रगान् सप्तमन्त्रिसुतान् अपि हत्वा, शूरम् अक्षं च निष्पिष्य, ग्रहणं समुपागमत् ॥ ७५ ॥

**व्याख्या**—(हनुमान्) पञ्च=पञ्चसंख्याकान्, सेनाग्रगान्=पिङ्गनेत्रादीन् सेनापतीन्, जम्बूमाल्यप्रभृतीन्, सप्त=सप्तसंख्याकान्, मन्त्रिसुतान्=अमात्यपुत्रान्, अपि=च, हत्वा=व्यापाद्य, शूरं=वीरम्, अक्षं=अक्षकुमारम्, रावणपुत्रम् च, निष्पिष्य=चूर्णयित्वा, ग्रहणं=ब्रह्मणः प्रतिष्ठारक्षणाय मेघनादप्रयुक्तब्रह्मास्त्रबन्धनम्, समुपागमत्=प्राप्तवान् ॥ ७५ ॥

**समासादिः**—अग्रे गच्छन्तीति अग्रगाः, सेनानाम् अग्रगाः सेनाग्रगाः, तान् सेनाग्रगान्। मन्त्रिणां सुताः मन्त्रिसुताः, तान् मन्त्रिसुतान् ॥ ७५ ॥

**भावार्थः**—अथ हनुमान् पिङ्गलनेत्रादीन् पञ्च सेनापतीन्, जाम्बमाल्यादीन् सप्तसचिवसुतान्, अक्षयकुमारं रावणतनयञ्च हत्वा, ब्रह्मणः प्रतिष्ठारक्षणाय मेघनादप्रयुक्तब्रह्मास्त्रबन्धनं समुपागमदिति भावः ॥ ७५ ॥

**भाषार्थ**—हनुमान्‌जी पाँच सेनापतियों, सात मन्त्रि-पुत्रों और अक्षयकुमार को मारकर मेघनाद द्वारा प्रयुक्त ब्रह्मास्त्र में (ब्रह्माजी का सम्मान रखने के लिए) स्वयं बँध गये ॥ ७५ ॥

**अस्त्रेणोन्मुक्तमात्मानं ज्ञात्वा पैतामहाद् वरात्।**
**मर्षयन् राक्षसान्वीरो मन्त्रिणस्तान् यदृच्छया ॥ ७६ ॥**

**अन्वयः**—वीरः पैतामहाद् वराद् आत्मानम् अस्त्रेण उन्मुक्तं ज्ञात्वा मन्त्रिणः तान् राक्षसान् मर्षयन् यदृच्छया (ग्रहणं समुपागमत्) ॥ ७६ ॥

**व्याख्या**—वीरः=महाबलशाली हनुमान्, पैतामहाद् वरात्=ब्रह्मदत्तात् वरदानात्, आत्मानं=स्वम्, अस्त्रेण, उन्मुक्तम्=अवध्यं, ज्ञात्वा=विदित्वा, मन्त्रिणः=बन्धकारिणः, तान् राक्षसान्=मेघनादकिङ्करान्, निशाचरान्, मर्षयन्=तदपराधान् क्षममाणः, यदृच्छया ग्रहेण समुपागमदिति पूर्वेण सम्बन्धः ॥ ७६ ॥

**समासादिः**—पितामहादागतं पैतामहः, तस्मात् पैतामहात् ॥ ७६ ॥

**भावार्थः**—राक्षसानां संहारकोऽञ्जनीनन्दनो महाबलवान् हनुमान् ब्रह्मणो वरदानप्रभावेणात्मानमायुधैरवध्यं विदित्वा तेषां निशाचराणामत्याचारं विसह्य स्वेच्छया रावणसभाप्रवेशबुद्धया बन्धनं प्राप्तवानिति भावः ॥ ७६ ॥

**भाषार्थ**—(अक्षयकुमार आदि योद्धाओं के अनन्तर मेघनाद द्वारा छोड़े गये ब्रह्मास्त्र में) वीर हनुमान् ब्रह्माजी के वर-प्रभाव से अपने को शस्त्र से अवध्य समझकर भी रावण की सभा में प्रवेश के लिये अपनी इच्छा से ब्रह्मास्त्र में बाँधकर ले जाने वाले राक्षसों का अपराध क्षमा करते हुए बन्धन में स्थित रहे ॥७६॥

**ततो दग्ध्वा पुरीं लङ्कामृते सीतां च मैथिलीम्।**
**रामाय प्रियमाख्यातुं पुनरायान्महाकपिः ॥ ७७ ॥**

**अन्वयः**—ततः महाकपिः मैथिलीं सीतां च ऋते लङ्कां पुरीं दग्ध्वा रामाय प्रियम् आख्यातुं पुनः आयात् ॥ ७७ ॥

**व्याख्या**—ततः=रावणसभाप्रवेशतद्दर्शनसंवादाद्यनन्तरं, महाकपिः=वानरश्रेष्ठो हनुमान्, मैथिलीं सीतां=जनकात्मजां सीतां (सीतानिवाससंस्थानम् अशोकवाटिकां विभीषणगृहं च ), ऋते=विना, लङ्कां=लङ्कापुरीं, दग्ध्वा=सन्दह्य, रामाय=सीतासमुपलब्धिसमुत्सुकाय, प्रियं=सीतादर्शनरूपमिष्टमाख्यातुं=निवेदयितुम्, पुनः=भूयः, आयात्=रामसमीपं समागतः ॥ ७७ ॥

**समासादिः**—मैथिलस्यापत्यं स्त्री मैथिली, तां मैथिलीम् । महांश्चासौ कपिः महाकपिः ॥ ७७ ॥

**भावार्थः**—बन्धनगतः हनुमान् रावणेन सह संवादानन्तरं तदाज्ञया लाङ्गूलयोजितेन वह्निना, सीतानिवासस्थानं अशोकवनं विभीषणनिवासस्थानं च विहाय लङ्कापुरीं दग्ध्वा रामाय सीताप्राप्तिरूपं सुखावहं संवादं निवेदयितुं प्रतिनिवृत्तः ॥ ७७ ॥

**भाषार्थ**—मेघनाद द्वारा ब्रह्मास्त्र से बाँधकर हनुमान्‌जी को रावण की सभा में लाने पर उसकी आज्ञा से उनकी पूंछ में वस्त्र बाँधकर आग लगा दी गयी। उसके बाद वानरश्रेष्ठ हनुमान् सीता, सीतानिवासस्थान अशोकवाटिका ( और विभीषण के घर ) को छोड़कर लंका को जलाकर राम से प्रिय सन्देश कहने के लिए राम के पास लौट आये ॥ ७७ ॥

**सोऽभिगम्य महात्मानं कृत्वा रामं प्रदक्षिणाम् ।**
**न्यवेदयदमेयात्मा दृष्टा सीतेति तत्त्वतः ॥ ७८ ॥**

**अन्वयः**—अमेयात्मा सः हनुमान् महात्मानं रामम् अभिगम्य प्रदक्षिणां कृत्वा ( च ) तत्त्वतः सीता दृष्टा इति न्यवेदयत् ॥ ७८ ॥

**व्याख्या**—अमेयात्मा=अपरिमितबलबुद्धिसम्पन्नः, सः=हनुमान्, महात्मानं=धैर्यवन्तं महामतिं, रामम् अभिगम्य=उपसृत्य, प्रदक्षिणां=परिक्रमणं, कृत्वा=विधाय, तत्त्वतः=वस्तुतः, सीता=जानकी भवत्प्राणप्रिया, दृष्टा=अवलोकिता, सम्भाषिता च, इति=एतद्वचनं रामाय, न्यवेदयत्=कथयामास ॥७८॥

**समासादिः**—अमेयः आत्मा यस्य स अमेयात्मा । महान् आत्मा यस्य स महात्मा, तं महात्मानम् ॥ ७८ ॥

**भावार्थः**—अपरिमेयबलबुद्धिविद्याधैर्यादिः आञ्जनेयो हनुमान् महामतिं रामं प्रदक्षिणीकृत्य 'मया भवत्प्राणवल्लभा भवन्तमेव ध्यायन्तीं भगवतीं सीतां सत्यं दृष्टा सम्भाषिता च' इति वचनं रामाय निवेदयामास ॥ ७८ ॥



**भाषार्थ**—अमित बल बुद्धि विद्या-धैर्यशाली हनुमान् ने महामति राम की प्रदक्षिणा करके कहा कि 'भगवन् ! मैंने निश्चय आपके चरण-कमल का ध्यान करती हुई भगवती सीता को देखा है और उनसे बातचीत भी की है' ॥७८॥

**( इति सुन्दरकाण्ड–कथासारः )**

**ततः सुग्रीवसहितो गत्वा तीरं महोदधेः ।**
**समुद्रं क्षोभयामास शरैरादित्यसन्निभैः ॥ ७९ ॥**

**अन्वयः**— ततः सुग्रीवसहितः ( रामः ) महोदधेः तीरं गत्वा, आदित्यसन्निभैः शरैः समुद्रं क्षोभयामास ॥ ७९ ॥

**व्याख्या**—ततः=सीतावृत्तान्तश्रवणानन्तरं ( सर्वान् वानरान् भल्लूकांश्चैकत्रीकृत्य ) सुग्रीवसहितः=सुग्रीवेण सहितो रामः, महोदधेः=शतयोजनविस्तीर्णस्य समुद्रस्य, तीरम्=तटम्, गत्वा=उपगम्य, आदित्यसन्निभैः=सूर्यसदृशैः, शरैः=बाणैः, समुद्रं=सागरं, क्षोभयामास=व्याकुलीचकार ॥ ७९ ॥

**समासादिः**—उदकानि धीयन्तेऽस्मिन्नित्युदधिः, महांश्चासौ उदधिः महोदधिः, तस्य महोदधेः । अदितेरपत्यं पुमानादित्यः, तेन सन्निभाः आदित्यसन्निभाः, तैः आदित्यसन्निभैः । सुग्रीवेण सहितः सुग्रीवसहितः ॥ ७९ ॥

**भावार्थः**—हनुमद्द्वारा सीतासमाचारं श्रुत्वा वानरान् भल्लूकांश्चैकत्रीकृत्य सुग्रीवसहितो रामः सागरसमीपमुपस्थाय लङ्कागमनमार्गमलब्ध्वा तीक्ष्णैः बाणैः तम् आपातालमाकुलीचकार ॥ ७९ ॥

**भाषार्थ**—पवनकुमार हनुमानजी के द्वारा सीता का समाचार सुनकर वानर और भालुओं की सेना इकट्ठा कर राम ने सुग्रीव के पास समुद्र के उत्तर तट पर जाकर लंका जाने के निमित्त मार्ग न पाने पर बाणों से समुद्र को व्याकुल कर दिया ॥ ७९ ॥

**दर्शयामास चात्मानं समुद्रः सरितां पतिः ।**
**समुद्रवचनाच्चैव नलं सेतुमकारयत् ॥ ८० ॥**

**अन्वयः**—सरितां पतिः समुद्रः आत्मानं दर्शयामास च, समुद्रवचनात् च एव नलं सेतुम् अकारयत् ॥ ८० ॥

**व्याख्या**—सरितां=नदीनाम्, पतिः=स्वामी, समुद्रः=सागरः, च ( रामाय ), आत्मानं=स्वम्, दर्शयामास=प्रदर्शितवान् । समुद्रवचनात्=सागरकथनात्, चैव=निश्चयेन, नलः=नलनामा वानरः, सेतुं=आलिम्, अकारयत्=कारितवान् ॥ ८० ॥

**समासादिः**—समुद्रस्य वचनं समुद्रवचनं, तस्मात् समुद्रवचनात् ॥ ८० ॥

**भावार्थः**—सरित्पतिः समुद्रः प्रत्यक्षीभूय विनयेन लङ्कामार्गमलब्ध्वा कुपितस्य श्रीरामस्यातितीक्ष्णेनैकेन बाणेन व्यथितः रामाय आत्मानं दर्शयामास, तत्कथनाच्च नलद्वारा श्रीरामः समुद्रे सेतुं कारितवानिति भावः ॥ ८० ॥

**भाषार्थ**—समुद्र के पार लंका में जाने के लिए मार्ग न मिलने पर श्रीराम-ने जब क्रुद्ध होकर एक ही बाण से समुद्र को क्षुब्ध कर दिया, तब नदियों के स्वामी समुद्र ( राम को अपने ऊपर क्रुद्ध समझ कर अपराध क्षमा कराने के लिए ) उनके पास आये और समुद्र ने प्रत्यक्ष होकर राम से कहा कि आप विश्वकर्मा के पुत्र नल नामक वानर से मेरे ऊपर पुल बँधवा कर सेना के सहित पार उतर जाइए। तदनुसार राम ने समुद्र के कथनानुसार नल के द्वारा उस पर पुल बँधवाया ॥ ८० ॥

**तेन गत्वा पुरीं लङ्कां हत्वा रावणमाहवे ।**
**रामः सीतामनुप्राप्य परां व्रीडामुपागमत् ॥ ८१ ॥**

**अन्वयः**—रामः तेन लङ्कां पुरीं गत्वा, आहवे रावणं हत्वा, सीताम् अनुप्राप्य, परां व्रीडाम् उपागमत् ॥ ८१ ॥

**व्याख्या**—तेन=नलनिर्मितेन सेतुना, लङ्काम्=लङ्कानाम्नीं, पुरीं =नगरीम्, गत्वा=प्राप्य, रामः=दाशरथिः, आहवे=सङ्ग्रामे, रावणं= दशाननं, हत्वा=व्यापाद्य, सीतां=जानकीम्, अनुप्राप्य=लब्ध्वा, परां= सातिशयां, व्रीडां=लज्जाम्, उपागमत्=प्राप्तवान् ( रावणगृहे चिरकालमुषि-तामिमां कथं गृह्णामीति भावः ) ॥ ८१ ॥

**भावार्थः**—रामचन्द्रः तेन सेतुना लङ्कानगरीं गत्वा रावणापमानितेन विभीषणेन मिलितो युद्धे सामात्यपुत्रबान्धवं रावणं निहत्य, सीतां प्राप्यापि कामिनो दशाननस्य भवने स्थितायाः सीताया स्वीकारे लोकापवादभीत्या लज्जापरवशो जात इति भावः ॥ ८१ ॥

**भावार्थ**—नल को मतङ्गमुनि का वरदान था कि तुम जिस वस्तु को छू दोगे वह पानी में नहीं डूब सकती है। इसलिए समुद्र ने रामजी से नल के द्वारा ही पुल बँधवाने का निवेदन किया। वानर-भालूओं की सेना के साथ रामचन्द्रजी उस सेतु द्वारा लङ्का में जाकर रावण को मारकर सीता को पुनः पाकर उसके परगृहवास के कारण अत्यन्त लज्जित हुए ॥ ८१ ॥

**तामुवाच ततो रामः परुषं जनसंसदि ।**
**अमृष्यमाणा सा सीता विवेश ज्वलनं सती ॥ ८२ ॥**



**अन्वयः**—ततः रामः जनसंसदि तां परुषम् उवाच, सा सती सीता अमृष्यमाणा ज्वलनं विवेश ॥ ८२ ॥

**व्याख्या**—ततः=लज्जोत्पादनानन्तरम् ( लज्जामपनेतुम् ), रामः=दास-रथिः, जनसंसदि=लोकसभायां, ताम्=सीतां, परुषं=निष्ठुरम्, उवाच=उक्त-वान् । सती=पतिव्रता, सा=प्रसिद्धा, सीता=जानकी, अमृष्यमाणा=असह-माना, ज्वलनम्=अग्नि, विवेश=प्रविष्टवती ॥ ८२ ॥

**समासादिः**—जनानां संसद्, तस्यां जनसंसदि । न मृष्यमाणा अमृष्यमाणा ।

**भावार्थः**—तदनन्तरं रामः सर्वसमक्षं सीतां प्रति 'त्वं बहुदिनं परगृहे स्थिता आसीः अतः लोकापवाददूरीकरणाय स्वकीयपातिव्रतस्य परीक्षा प्रदेया त्वया, अन्यथा त्वां न ग्रहीष्यामि' इति निष्ठुरं वचनमुवाच । ततः सती सीता तन्निष्ठुरवचनम् असहमाना सती सहर्षम् अग्नौ प्रविवेशेति भावः ॥ ८२ ॥

**भाषार्थ**—फिर राम ने सब लोगों के सामने ही सीता से उनके सतीत्व में सन्देह करने वाले निष्ठुर वचन कहे, तब पतिव्रता सीता उग्र वचन को न सहती हुई अपने पातिव्रत्य की परीक्षा देने के लिए प्रदीप्त अग्नि में प्रवेश कर गई। राम तो सीता के निर्मल पातिव्रत्य को जानते ही थे, किन्तु लोकापवाद को दूर करने के लिए उन्होंने ऐसा कहा था ॥ ८२ ॥

**ततोऽग्निवचनात्सीतां ज्ञात्वा विगतकल्मषाम् ।**
**कर्मणा तेन महता त्रैलोक्यं सचराचरम् ॥ ८३ ॥**
**सदेवर्षिगणं तुष्टं राघवस्य महात्मनः ।**
**बभौ रामः सम्प्रहृष्टः पूजितः सर्वदैवतैः ॥ ८४ ॥**

**अन्वयः**—ततः अग्निवचनात्, सीतां विगतकल्मषां ज्ञात्वा महात्मनः राघवस्य तेन महता कर्मणा सदेवर्षिगणं सचराचरं तुष्टम् । ( ततः ) सर्वदैवतैः पूजितः सम्प्रहृष्टः रामः बभौ ॥ ८३–८४ ॥

**व्याख्या**—ततः=अग्निप्रवेशानन्तरम्, अग्निवचनात्=वह्निवाक्यात्, सीतां= जानकीं, विगतकल्मषां=निष्पापां, ज्ञात्वा=विदित्वा, ( रामः तां स्वीकृतवा-निति शेषः ) महात्मनः=महानुभावस्य, राघवस्य=रामस्य, तेन कर्मणा= कार्येण, सदेवर्षिगणं=देवर्षिवृन्दसहितं, सचराचरं=स्थावरजङ्गमात्मकं, त्रैलोक्यं =त्रिभुवनं, तुष्टं=प्रसन्नं जातम् । ततः सर्वदैवतैः=सकलदेवैः, पूजितः= सम्मानितः, अत एव सम्प्रहृष्टः=अतीवानन्दितः रामः, बभौ=शुशुभे ॥८३-८४॥

**समासादिः**—अग्नेर्वचनमग्निवचनं, तस्मात् अग्निवचनात् । विगतं कल्मषं यस्याः सा विगतकल्मषा, तां विगतकल्मषाम् । सर्वाणि च तानि दैवतानि सर्व-

देवतानि, तैः सर्वदैवतैः । त्रयाणां लोकानां समाहारः त्रिलोकी एव त्रैलोक्यम् । चराश्च अचराश्च चराचरः, तैः सह वर्तत इति सचराचरम् । देवाश्च ऋषयश्च देवर्षयः, तेषां गणाः देवर्षिगणाः, तैः सह वर्तत इति सदेवर्षिगणस्तं सदेवर्षिगणम् ।

**भावार्थः**—ततोऽग्नौ सहर्षं प्रविश्य सतीत्वपरीक्षानन्तरं 'हे राघव ! विशुद्धां निष्पापामिमां सीतां गृहाण' इति वह्निवाक्यात् सीतां पापसम्बन्धशून्यां विदित्वा रामस्तां स्वीकृतवान् । परमोदारस्य श्रीरामस्य विस्मयकारिणा अनेन कार्येण त्रिभुवनवासिनो देवर्षिमनुष्यवानरभल्लूकादयः परमप्रसन्ना अभवन् । सर्वैः सम्मानितो रामश्चातीव हृष्टः सन् शुशुभे ॥ ८३-८४ ॥

**भाषार्थ**—अग्निपरीक्षा के बाद 'हे रामजी सीता सर्वथा शुद्ध और निष्पाप है, इन्हें आप स्वीकार कीजिए, इस प्रकार अग्नि के कहने से सीता को निष्पाप समझ कर राम ने उन्हें स्वीकार कर लिया । राम के उस अद्भुत कर्म को देखकर त्रिलोकनिवासी देवता, ऋषि, मनुष्य, वानर, भालू प्रभृति सभी परम प्रसन्न हुए और सभी से सम्मानित होकर राम अत्यन्त प्रसन्न हुए और सुशोभित होने लगे ॥ ८३-८४ ॥

**अभिषिच्य च लङ्कायां राक्षसेन्द्रं विभीषणम् ।**
**कृतकृत्यस्तदा रामो विज्वरः प्रमुमोद ह ॥ ८५ ॥**

**अन्वयः**—लङ्कायां राक्षसेन्द्रं विभीषणं च अभिषिच्य, तथा कृतकृत्यः विज्वरः रामः प्रमुमोद ह ॥ ८५ ॥

**व्याख्या**—लङ्कायाम्=रावणराज्यसिंहासने, राक्षसेन्द्रं=राक्षसकुलप्रमुखं, विभीषणं=रावणकनिष्ठभ्रातरम्, च=एव, अभिषिच्य=अभिषिक्तं कृत्वा, तदा= अभिषेककार्यसम्पादनानन्तरं, कृतकृत्यः=सम्पादितसकलकार्यः, विज्वरः= विगतसन्तापः, रामः=दाशरथिः, प्रमुमोद=परमः प्रसन्नोऽभवत्, ह इति हर्षाधिक्ये ॥ ८५ ॥

**समासादिः**—राक्षसेषु इन्द्रः, तं राक्षसेन्द्रम् । कृतानि कृत्यानि येन सः कृतकृत्यः । विगतो ज्वरो यस्य स विज्वरः ॥ ८५ ॥

**भावार्थः**—तदनन्तरं रामो लङ्काराज्ये रावणस्यानुजमेव विभीषणम् अभिषिच्य सम्पादितदेवर्षिकार्यैः सर्वसन्तापरहितः सन् परं हर्षमवाप्तवानिति भावः ।

**भाषार्थ**—तदनन्तर लङ्का के राज्यसिंहासन पर रावण के कनिष्ठ भ्राता विभीषण को अभिषिक्त करके कृतकार्य और सर्वविध चिन्तारहित होकर श्रीराम परम प्रसन्न हुए ॥ ८५ ॥



**देवताभ्यो वरं प्राप्य समुत्थाप्य च वानरान् ।**
**अयोध्यां प्रस्थितो रामः पुष्पकेण सुहृद्वृतः ॥ ८६ ॥**

**अन्वयः**—देवताभ्यः वरं प्राप्य वानरान् समुत्थाप्य च, सुहृद्वृतः रामः पुष्पकेण अयोध्यां प्रस्थितः ॥ ८६ ॥

**व्याख्या**—देवताभ्यः=इन्द्रादिदेवेभ्यः, वरम्=आशीर्वादं, प्राप्य=लब्ध्वा, वानरान्=युद्धे रावणबाणनिहतान् कपीन् भल्लूकांश्च, उत्थाप्य=पुनर्जीवितान् कृत्वा, सुहृद्वृतः=सुग्रीवविभीषणहनुमदङ्गदादिपरिवेष्टितः, रामः=दाशरथिः, पुष्पकेण=पुष्पकविमानेन, अयोध्यां=साकेतं, प्रस्थितः=चलितः ॥ ८६ ॥

**समासादिः**—सुहृद्भिः वृतः सुहृद्वृतः ॥ ८६ ॥

**भावार्थः**—ततो रामः देवानामाशीर्वादं गृहीत्वा रणे रावणबाणैर्निहतान् वानरान् भल्लूकांश्च पुनर्जीवित्वा सुग्रीवाङ्गदविभीषणहनुमदादिभिः सुहृद्भिः परिवेष्टितो विभीषणसमर्पितकुबेरपुष्पकविमानेन साकेतमुद्दिश्य प्रस्थितवान् इति भावः ॥ ८६ ॥

**भाषार्थ**—श्रीराम ने देवताओं से आशीर्वाद लेकर और युद्ध में मरे हुए वानर एवं भालुओं को पुनर्जीवित कर सुग्रीव आदि मित्रों के साथ विभीषण द्वारा सप्रेम समर्पित पुष्पक विमान से अयोध्या की ओर प्रस्थान किया ॥८६॥

**भरद्वाजाश्रमं गत्वा रामः सत्यपराक्रमः ।**
**भरतस्यान्तिके रामो हनुमन्तं व्यसर्जयत् ॥ ८७ ॥**

**अन्वयः**—सत्यपराक्रमः रामः रामः भरद्वाजाश्रमं गत्वा भरतस्य अन्तिके हनुमन्तं व्यसर्जयत् ॥ ८७ ॥

**व्याख्या**—सत्यपराक्रमः=अमोघवीर्यः, रामः=लोकाभिरामदाता, रामः= दाशरथिः, भरद्वाजाश्रमं=भरद्वाजमुनेराश्रमं, गत्वा=उपगम्य, भरतस्य= कैकेयीतनयस्य, अन्तिके=समीपे, हनुमन्तम्=आञ्जनेयं, व्यसर्जयत्= प्रेषयामास ॥ ८७ ॥

**समासादिः**—सत्यः पराक्रमो यस्य सः सत्यपराक्रमः । भरद्वाजस्याश्रमो भरद्वाजाश्रमः, तं भरद्वाजाश्रमम् ॥ ८७ ॥

**भावार्थः**—सत्यविक्रमो रामः भरद्वाजस्य महर्षेः आश्रममागत्य भरतस्य समीपे स्वप्रत्यागमननिवेदनाय वेगवन्तं पवनकुमारं हनुमन्तं प्रेषयामासेति भावः ॥ ८७ ॥

**भाषार्थ**—सत्यपराक्रम राम ने भरद्वाज मुनि के आश्रम पर पहुँच कर

अपने लौटने की खबर देने के लिए मन के समान अतिशीघ्रगामी अञ्जनीनन्दन हनुमान् को भरत के पास भेजा ॥ ८७ ॥

**पुनराख्यायिकां जल्पन् सुग्रीवसहितस्तदा ।**
**पुष्पकं तत्समारुह्य नन्दिग्रामं ययौ तदा ॥ ८८ ॥**

**अन्वयः**—तदा सुग्रीवसहितः पुनः तत् पुष्पकं समारुह्य ( श्रीरामः ) आख्यायिकां जल्पन् तदा नन्दिग्रामं ययौ ॥ ८८ ॥

**व्याख्या**—तदा=तस्मिन् भरद्वाजाश्रमान्निर्गमनसमये, सुग्रीवसहितः=सुग्रीवादिसमन्वितः (श्रीरामः), तत्=प्रसिद्धं, पुष्पकं=पुष्पकनामकं व्योमयानं, पुनः=भूयः, समारुह्य=अधिष्ठाय, आख्यायिकां=भरतसम्बन्धितकथां, जल्पन्=कथयन्, तदा=हनुमद्गमनानन्तरमेव, नन्दिग्रामं=तात्कालिकभरतवसतिम्, ययौ=जगाम ॥ ८८ ॥

**समासादिः**—सुग्रीवेण सहितः सुग्रीवसहितः ॥ ८८ ॥

**भावार्थः**—भरद्वाजाश्रमान्निर्गत्य भरतस्य समीपे हनुमन्तं च सम्प्रेष्य सुग्रीवादिसहितो रामः पुनः पुष्पकं समारुह्य, भरतवृत्तं कथयन् हनुमद्गमनानन्तरमेव तात्कालिकभरतनिवासस्थानं नन्दिग्रामं जगामेति भावः ॥ ८८ ॥

**भाषार्थ**—भरद्वाज मुनि के आश्रम से विदा होकर और हनुमान्जी को भरत के पास भेजकर सुग्रीव आदि मित्रों के साथ फिर उस पुष्पक विमान पर पुनः चढ़ कर भरत-सम्बन्धी बातचीत करते हुए रामजी नन्दिग्राम की ओर चले ॥ ८८ ॥

**नन्दिग्रामे जटां हित्वा भ्रातृभिः सहितोऽनघः ।**
**रामः सीतामनुप्राप्य राज्यं पुनरवाप्तवान् ॥ ८९ ॥**

**अन्वयः**—अनघः रामः भ्रातृभिः सहितः नन्दिग्रामे जटां हित्वा, सीताम् अनुप्राप्य, पुनः राज्यम् अवाप्तवान् ॥ ८९ ॥

**व्याख्या**—अनघः=पापरहितः, रक्षितपितृप्रतिज्ञो वा, रामः=कौशल्यानन्दनः, भ्रातृभिः=भरतादिभिः त्रिभिः अनुजैः, सहितः=समन्वितः, नन्दिग्रामे=भरतनिवासस्थाने, जटां=शिरसि संहतान् केशान्, हित्वा=परित्यज्य, सीतां=जानकीम्, अनुप्राप्य=सिंहासने सीतया सहाभिषेकं लब्ध्वा, पुनः=भूयः, राज्यम्=अयोध्याराज्यम्, अवाप्तवान्=प्राप्तवान् ॥ ८९ ॥

**भावार्थः**—पितुराज्ञापालनेन निष्पापो रामः भरतलक्ष्मणशत्रुघ्नैः अनुजैः सह नन्दिग्रामे जटां त्यक्त्वा सुवस्त्रादिभिरलङ्कृतः राजसिंहासने सीतया सहाभिषेकं लब्ध्वा कैकेय्यनुरोधात् पितुराज्ञया सहर्षविसृष्टं निष्कण्टकं अयोध्याराज्यं प्राप्तवानिति भावः ॥ ८९ ॥



**भाषार्थ**—पिता की आज्ञा के पालन से निष्पाप राम भाइयों के साथ नन्दिग्राम में जटाजूट को कटवाकर वस्त्र एवं आभूषणों से सुसज्जित हो तथा मुनि-वेष त्याग कर पूर्ववत् सुन्दरी सीता के साथ पुनः अयोध्या के राज्य को प्राप्त किया ॥ ८९ ॥

( इति युद्धकाण्ड-कथासारः )

**प्रहृष्टमुदितो लोकस्तुष्टः पुष्टः सुधार्मिकः ।**
**निरामयो ह्यरोगश्च दुर्भिक्षभयवर्जितः ॥ ९० ॥**

**अन्वयः**—लोकः प्रहृष्टमुदितः तुष्टः पुष्टः सुधार्मिकः निरामयः अरोगः दुर्भिक्षभयवर्जितः च ( आसीत् ) ॥ ९० ॥

**व्याख्या**—(तदा रामे राज्यं प्रशासति) लोकः=प्रजाजनः, प्रहृष्टमुदितः=हर्षसञ्जातपुलकः, तुष्टः=सन्तुष्टः, पुष्टः=दारिद्र्यादिक्लेशतारहितः, सधार्मिकः=स्वधर्मनिरतः, निरामयः=व्याधिहीनः, आरोगः=रोगरहितः, दुर्भिक्षवर्जितः=अन्नकष्टचोरभयरहितः, आसीदिति शेषः ॥ ९० ॥

**समासादिः**—प्रकर्षेण हृष्टः प्रहृष्टः, प्रहृष्टश्चासौ मुदितः प्रहृष्टमुदितः । निर्गत आमयो यस्मात् स निरामयः । नास्ति रोगो यस्मिन् स अरोगः । भिक्षाणां व्यद्धि दुर्भिक्षं, दुर्भिक्षाद्भयं दुर्भिक्षभयं, दुर्भिक्षभयेन वर्जितः दुर्भिक्षभयवर्जितः, यद्वा दुर्भिक्षञ्च भयञ्च दुर्भिक्षभये, ताभ्यां वर्जितः दुर्भिक्षभयवर्जितः।

**भावार्थः**—तदानीं रामराज्ये सर्वे अपि जनाः सदा हृष्टाः तुष्टाः धार्मिकाः नीरोगाः अन्नकष्टचौरादिभयरहिताश्च आसन्निति भावः ॥ ९० ॥

**भाषार्थ**—उस समय राम के राज्य में उनकी प्रजा हृष्ट, पुष्ट, तुष्ट, धार्मिक, रोगरहित तथा अन्नकष्ट और चोरभय आदि से रहित थी, किसी प्रकार का कष्ट नहीं था ॥ ९० ॥

**न पुत्रमरणं केचिद् द्रक्ष्यन्ति पुरुषाः क्वचित् ।**
**नार्यश्चाविधवा नित्यं भविष्यन्ति पतिव्रताः ॥ ९१ ॥**

**अन्वयः**—केचित् पुरुषाः क्वचित् पुत्रमरणं न द्रक्ष्यन्ति, नार्यः च अविधवा नित्यं पतिव्रताः भविष्यन्ति ॥ ९१ ॥

**व्याख्या**—केचित्=केऽपि, पुरुषाः=नराः, क्वचित्=कुत्रापि, पुत्रमरणं=सुतनिधनं, न द्रक्ष्यन्ति=न अवलोकयिष्यन्ति, पितरि जीवति सति न पुत्रमरणं

भविष्यति । नार्यः=स्त्रियः च, अविधवाः=वैधव्यरहिताः, नित्यं=निरन्तरं, पतिव्रता=सतीत्वसम्पन्नाः, स्वस्वपत्यनुकूलवर्तिन्यो भविष्यन्ति ॥ ९१ ॥

**समासादिः**—पुत्राणां मरणं पुत्रमरणम् । विगतो धवो यासां ता विधवाः, न विधवा अविधवा ॥ ९१ ॥

**भावार्थः**—रामराज्ये केचिदपि प्राणिनः पुत्रमृत्युं न द्रक्ष्यन्ति, अर्थात् पितरि जीवति न पुत्रस्य मृत्युर्भविष्यति स्त्रियश्च निरन्तरं पतिव्रताः सत्यो वैधव्यदुःखं नानुभविष्यन्तीति भावः ॥ ९१ ॥

**भावार्थ**—रामजी के राज्य में कोई व्यक्ति कभी पुत्र के मरण को नहीं देखेगा और स्त्रियाँ विधवा नहीं होंगी, सदा पातिव्रत्य धर्म का पालन करती रहेंगी ॥ ९१ ॥

**न चाग्निजं भयं किञ्चिन्नाप्सु मज्जन्ति जन्तवः ।**
**न वातजं भयं किञ्चिन्नापि ज्वरकृतं तथा ॥ ९२ ॥**
**न चापि क्षुद्भयं तत्र न तस्करभयं तथा ।**
**नगराणि च राष्ट्राणि धनधान्ययुतानि च ॥ ९३ ॥**
**नित्यं प्रमुदिता सर्वे यथा कृतयुगे तथा ।**

**अन्वयः**—तत्र किञ्चित्, अग्निजं भयं न, जन्तवः अप्सु न मज्जन्ति, किञ्चित् वातजं भयं न, तथा ज्वरकृतम् अपि ( किञ्चित् भयं ) न, क्षुद्भयं च अपि न, तथा तस्करभयं न ( भविष्यति ), नगराणि राष्ट्राणि च धनधान्ययुतानि च (भविष्यन्ति) सर्वे यथा कृतयुगे तथा नित्यं प्रमुदिताः भविष्यन्ति ॥ ९२-९३ ॥

**व्याख्या**—तत्र=रामराज्ये, अग्निजं=वह्निजन्यं, भयं=भीतिः, किञ्चिदपि=ईषदपि, न भविष्यति । जन्तवः=प्राणिनः, अप्सु=जलेषु, सरोवरतटादिषु । न मज्जन्ति=मग्ना न भविष्यन्ति । किञ्चिदपि=स्वल्पमपि, वातजं=पवनोद्भूतं, भयं=भीतिः, न । तथा ज्वरकृतं=ज्वरजनितम्, अपि=च भयं, न=नहि ( भविष्यति ) । क्षुद्भयं च अपि=क्षुधाजन्यं भयं चापि न । तथा तस्करभयं=चौरभयं, न=नहि भविष्यति । नगराणि=पुराणि, राष्ट्राणि=जनपदाः च, धनधान्ययुतानि=वित्तशस्यसम्पन्नानि च, भविष्यन्ति, अत एव सर्वे=सकलाः, जना=नागरिका जानपदाश्च, यथा=येन प्रकारेण, कृतयुगे=सत्ययुगे, तथा=तेन प्रकारेण, त्रेतायामपि नित्यम्=निरन्तरं, प्रमुदिताः=हर्षिताः भविष्यन्ति ॥ ९२-९३ ॥

**समासादिः**—क्षुधाभयं क्षुद्भयम् । तस्करेभ्यो भयं तस्करभयम् । धनानि च धान्यानि चेति धनधान्यानि, तैर्युतानि धनधान्ययुतानि । अग्नेः जातमिति अग्निजम् । वातात् जातं वातजम् । ज्वरेण कृतं ज्वरकृतम् ॥ ९२-९३ ॥



**भावार्थः**—रामराज्ये अग्निजलवायुक्षुधादिजन्यं किमपि भयं न भविष्यति । पौराः जानपदाश्च अपि धनधान्यसमृद्धिसम्पन्ना भविष्यति ॥ ९२-९३ ॥

**भावार्थ**—रामराज्य में किसी को भी अग्नि से कुछ भी भय नहीं होगा । कोई भी प्राणी पानी में डूबकर नहीं मरेगा, न वायु से ही किसी को प्राणभय का सकट पहुँचेगा । न ज्वर ही किसी को कष्ट देगा, न तो भूख से ही कोई मरेगा । कहीं भी चोरी नहीं होगी, शहर और देहात सब धनधान्य से परिपूर्ण रहेंगे । त्रेता में भी सतयुग की तरह सब आनन्द से रहेंगे और आराम करेंगे ॥ ९२-९३ ॥

**अश्वमेधशतैरिष्ट्वा तथा बहुसुवर्णकैः ॥ ९४ ॥**
**गवां कोटययुतं दत्वा विद्वद्भ्यो विधिपूर्वकम् ।**
**असंख्येयं धनं दत्वा ब्राह्मणेभ्यो महायशाः ॥ ९५ ॥**
**राजवंशाञ्छतगुणान् स्थापयिष्यति राघवः ।**
**चातुर्वर्ण्यं च लोकेऽस्मिन् स्वे स्वे धर्मे नियोक्ष्यति ॥ ९६ ॥**

**अन्वयः**—महायशाः राघवः बहुसुवर्णकैः अश्वमेधशतैः इष्ट्वा तथा विद्वद्भ्यः, विधिपूर्वकं गवां कोटययुतं दत्वा, ब्राह्मणेभ्यः असंख्येयं धनं दत्वा, शतगुणान् राजवंशान् स्थापयिष्यति । अस्मिन् लोके चातुर्वर्ण्यं स्वे स्वे धर्मे नियोक्ष्यति च ॥ ९४-९५-९६ ॥

**व्याख्या**—महायशाः=अतुलनीयकीर्तिः, राघवः=रामः, बहुसुवर्णकैः=असंख्यककाञ्चनदक्षिणैः, अश्वमेधशतैः=शतसंख्याकैरश्वमेधयागैः, इष्ट्वा=यज्ञं कृत्वा, तथा=अपि च, विद्वद्भ्यः=वैदिककर्मकाण्डिभ्यः पण्डितेभ्यः, विधिपूर्वकं=यथाविधि, गवां=धेनूनां, कोटययुतं=दशसहस्रकोटिः, दत्वा=समर्प्य, ब्राह्मणेभ्यः=साधारणविप्रेभ्यः, असंख्येयं=अपरिमितं, धनं=वित्तं च, दत्वा=प्रदाय, शतगुणान्=असंख्येयगुणगणान्वितान्, राजवंशान्=राजकुलानि, स्थापयिष्यति=निवेशयिष्यति । तथा अस्मिन् लोके=भूलोके, चातुर्वर्ण्यं=चातुर्वर्णान् ब्राह्मणक्षत्रियवैश्यशूद्रान्, स्वे स्वे=निजे निजे, धर्मे=कर्तव्यकर्मणि, नियोक्ष्यति=प्रवर्तयिष्यति ॥ ९४-९५-९६ ॥

**समासादिः**—कृतं युगं कृतयुगं, तस्मिन् कृतयुगे । अश्वस्य मेधो हिंसा येषु ते अश्वमेधाः, तेषां शतानि अश्वमेधशतानि, तैः अश्वमेधशतैः । बहूनि सुवर्णानि येषु ते बहुसुवर्णकाः, तैः बहुसुवर्णकैः । विधिः पूर्वो यस्मिन् तत् विधिपूर्वकम् । कोटीनाम् अयुतं कोटययुतम् । महत् यशो यस्य स महायशाः । राज्ञां वंशा

राजवंशास्तान् राजवंशान् । शतानि गुणा येषां ते शतगुणाः, तान् शतगुणान् । चत्वारो वर्णाः चतुर्वर्णाः, चतुर्वर्ण एव चातुर्वर्ण्यम् ॥ ९४-९५-९६ ॥

**भावार्थः**—रामः असंख्यसुवर्णदायिनः अश्वमेधयज्ञान् कृत्वा विद्वद्भ्यः कोटिसंख्याः गाः ब्राह्मणेभ्यः प्रभूतं धनं प्रदाय पृथिव्यामपरिमितगुणयुक्तानि भूपकुलानि स्थापयित्वा ब्राह्मणक्षत्रियवैश्यशूद्रसंज्ञकान् चतुरो वर्णान् स्वे स्वे धर्मे नियोजयिष्यतीति भावः ॥ ९४-९५-९६ ॥

**भाषार्थ**—अतुलकीर्ति श्रीराम असंख्य सुवर्ण दक्षिणा वाले सैकड़ों अश्वमेध यज्ञ करके, वैदिक विद्वानों को विधिपूर्वक दश हजार करोड़ गौ और साधारण ब्राह्मणों को असंख्य धन देकर, अनेक गुणों से सम्पन्न अगणित राजवंश की स्थापना कर, इस मर्त्यलोक में ब्राह्मण, क्षत्रिय, वैश्य और शूद्र, इन चार वर्णों को अपने-अपने धर्मों में लगायेंगे ॥ ९४-९५-९६ ॥

**दशवर्षसहस्राणि दशवर्षशतानि च ।**
**रामो राज्यमुपासित्वा ब्रह्मलोकं प्रयास्यति ॥ ९७ ॥**

**अन्वयः**—रामः दशवर्षसहस्राणि दशवर्षशतानि च राज्यम् उपासित्वा ब्रह्मलोकं प्रयास्यति ॥ ९७ ॥

**व्याख्या**—राम =कौशल्यातनयः, दशवर्षसहस्राणि= दशसंख्याकसहस्रवर्षाणि ( १०००० ), दशवर्षशतानि=एक सहस्रवर्षाणि ( १००० ) च एतदुभयोः सङ्कलनया एकादशसहस्रवर्षाणि (११०००), राज्यम्=प्रजापालनविधानभारम्, उपासित्वा=परिपाल्य, ब्रह्मलोकं=वैकुण्ठं, प्रयास्यति=गमिष्यति ॥९७॥

**समासादिः**—वर्षाणां सहस्राणि वर्षसहस्राणि । वर्षाणां शतानि वर्षशतानि ॥ ९७ ॥

**भावार्थः**—मर्यादापुरुषोत्तमः श्रीरामः एकादशसहस्रवर्षपर्यन्तं राज्यं कृत्वा वैकुण्ठलोकं गमिष्यतीति भावः ॥ ९७ ॥

**भाषार्थ**—मर्यादापालक भगवान् रामचन्द्र दस हजार और दस सौ वर्ष अर्थात् ग्यारह हजार (११०००) वर्ष तक राज्य करके वैकुण्ठधाम पधारेंगे ।

( इति उत्तरकाण्ड-कथासारः )

## अथ मूलरामायणफलश्रुतिवर्णनम्

**इदं पवित्रं पापघ्नं पुण्यं वेदैश्च सम्मितम् ।**
**यः पठेत् रामचरितं सर्वपापैः प्रमुच्यते ॥ ९८ ॥**



**अन्वयः**—यः पवित्रं पापघ्नं पुण्यं वेदैः च सम्मितम् इदं रामचरितं पठेत् ( सः ) सर्वपापैः प्रमुच्यते ॥ ९८ ॥

**व्याख्या**—यः=कश्चिज्जनः, पवित्रं=पावनं, पापघ्नं=सकलकल्मषहरं, पुण्यं=श्रेयस्करं, वेदैः=श्रुतिभिः, सम्मितं=सदृशं च, इदम्=एतत्, रामचरितं=रामचरित्रात्मकं संक्षिप्तरामायणं, पठेत्=अभ्यसेत् वदेद् वा, सः=एतदध्ययनकर्ता ( वक्ता वा ), सर्वपापैः=निःशेषैर्दुश्चरितैः, प्रमुच्यते=मुक्तो भवति ॥ ९८ ॥

**समासादिः**—पापानि हन्तीति पापघ्नम् । रामस्य चरितं रामचरितम् । सर्वाणि तानि पापानि, तैः सर्वपापैः ॥ ९८ ॥

**भावार्थः**—यः कोऽपि नरः श्रद्धया पावनं सर्वदुःखहरं पुण्यकरं वेदसदृशमिदं संक्षिप्तं मूलरामायणं पठेत् वदेद्वा स सर्वपापविमुक्तो भवतीति भावः ॥ ९८ ॥

**भाषार्थ**—जो मनुष्य परमपवित्र, पापनाशक, पुण्यप्रद और वेद-सदृश इस संक्षिप्त रामचरित्र को पढेगा या कहेगा, वह सम्पूर्ण पापों से मुक्त हो जायेगा ।

**एतदाख्यानमायुष्यं पठन् रामायणं नरः ।**
**सपुत्रपौत्रः सगणः प्रेत्य स्वर्गे महीयते ॥ ९९ ॥**

**अन्वयः**—एतद् आयुष्यं रामायणम् आख्यानं पठन् नरः सपुत्रपौत्रः सगणः प्रेत्य स्वर्गे महीयते ॥ ९९ ॥

**व्याख्या**—एतत्=इदम् अधुनोक्तम्, आयुष्यम्=आयुर्वृद्धिकरं, रामायणं=रामचरितम् आख्यानं=इतिहासं, पठन्=अधीयानः, नरः=मनुष्यः, सपुत्रपौत्रः=पुत्रपौत्रसहितः, सगणः=सपरिवारः, प्रेत्य=मृत्वा, शरीरं त्यक्त्वा, स्वर्गे=देवलोके, महीयते=पूजां लभते, स्वर्गिभिः सत्कृतस्तत्र वसतीति भावः ॥९९॥

**समासादिः**—ईयते इत्ययनं, रामस्य अयनं चरितं यस्मिन् तत् रामायणम्, यद्वा रामः अयनं प्रतिपाद्यो यस्य तत् रामायणम्, अथवा रामः ईयते चर्च्यते यस्मिन् काव्ये तद्रामायणम् । पुत्रस्यापत्यानि पुमांसः पौत्राः, पुत्राश्च पौत्राश्चेति पुत्रपौत्राः, तैः सह वर्तते इति सपुत्रपौत्रः । गणैः सह वर्तमानः सगणः । आयुषे हितं आयुष्यम् ॥ ९९ ॥

**भावार्थः**—य इदं रामचरित्रात्मकं रामायणं पठेत् स नरः अस्मिन् संसारे पुत्रैः पौत्रैश्च सहितः दीर्घायुर्लब्ध्वा अन्ते स्वर्गं गत्वा सुखेन वसतीति भावः ॥

**भाषार्थ**—आयु को बढ़ानेवाली इस रामायण की कथा को पढ़ता हुआ

पुरुष इस संसार में अपने पुत्र और पौत्रों का सुख प्राप्त करता है और मरने के बाद स्वर्ग में जाकर दिव्य सुख पाता है ॥ ९९ ॥

पठन् द्विजो वागृषभत्वमीयात्
स्यात् क्षत्रियो भूमिपतित्वमीयात्
वणिग्जनः पण्यफलत्वमीयात्
जनश्च शूद्रोऽपि महत्त्वमीयात् ॥ १०० ॥

**अन्वयः**—( एतद्रामायणम् ) द्विजः पठन् वागृषभत्वं ईयात्, स्यात् क्षत्रियः भूमिपतित्वम् ईयात्, वणिग्जनः पण्यफलत्वम् ईयात्, च शूद्रः जनः अपि महत्त्वम् ईयात् ॥ १०० ॥

**व्याख्या**—( एतद् रामायणं महाकाव्यम् ) द्विजः = ब्राह्मणः, पठन=अधीयानः, वागृषभत्वं = वाग्मितां वचनरचनापाटवप्रधानतां वा, ईयात् = प्राप्नुयात् । स्यात् = यदि ( अत्र स्यादिति यद्यर्थेऽव्ययः ), बाहुजः = क्षत्रियः, पठेत् तदा भूमिपतित्व=महीश्वरत्वं, ईयात् लभेत् । वणिग्जनः=वैश्यः, पण्यफलत्व = क्रय-विक्रयकर्मणि सफलत्वम् ईयात् = प्राप्नुयात् । शूद्रः जन = चतुर्थवर्णस्थो जनः, अपि=निश्चयेन, महत्त्वं = गौरवं स्वजातिप्राधान्यम्, ईयाद्=प्राप्नुयात् ॥१००॥

**समासादिः**—वाचि ऋषभः वागृषभः, तस्य भावः वागृषभत्वम् । भूमेः पतिः भूमिपतिः, तस्य भावः भूमिपतित्वम् । पण्यानां फलं पण्यफलं, तस्य भावः पण्यफलत्वम् । महतो भावः महत्त्वम् ॥ १०० ॥

**भावार्थः**—यदीदं रामायणं ब्राह्मण पठेत्तदा स वाग्मी भवेत् । यदि क्षत्रियः पठेत्तदाऽसौ साम्राज्यं प्राप्नुयात् । यदि वैश्यः पठेतदा स बहुधनं लभेत् । यदि शूद्रः पठेत् तदा सर्वत्र सम्मानितो भवेदिति भावः ॥ १०० ॥

**भावार्थ**—यदि इस रामायण को ब्राह्मण पढ़े तो वह वक्ता हो, क्षत्रिय पढ़े तो राज्य प्राप्त करे । वैश्य पढ़े तो उसे व्यापार में लाभ हो, यदि शूद्र पढ़े तो समाज में उसका गौरव हो ॥ १०० ॥

इत्यार्षे वाल्मीकीये आदिकाव्ये श्रीमद्रामायणे बालकाण्डे पं श्रीकृष्णमणि-त्रिपाठिना कृतया सम्पादितया च विमलाख्यया व्याख्यया सहितः प्रथमः सर्गः समाप्तः ।

इति मूलरामायणं समाप्तम् ।